UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES - 193

श्रीअगस्त्यमुनिविरचितम्

श्रीविद्यामन्त्रभाष्यम्

(सम्पादककृतलक्ष्मीटिप्पणीयुतं च)

ŚRĪVIDYĀMANTRABHĀŚHYAṀ

of

ŚRĪ AGASTYAMUNI

(With Editor's Lakshmī Tippanī)

Critically Edited by

Dr. T.V. Sathyanarayana, M.A., Ph.D., Vidwan

ORIENTAL RESEARCH INSTITUTE, MYSORE - 5

2001

Price : Rs. 20/-

13435 वेदान्त

Oriental Research Institute Series - 193

अगस्त्यमुनिविरचितम्

श्रीविद्यामन्त्रभाष्यम्

(सम्पादककृतलक्ष्मीटिप्पणीयुतं च)

SRIVIDYAMANTRABHASHYAM

of

SRIAGASTYAMUNI

(with Editor's Lakshmi Tippani)

Critically Edited by

Prathibhapatu, Vedasuktavidyasagara, Vedavidyanidhi

Dr. T.V. Sathyanarayana, M.A., Ph.D., Vidwan

Alankara vyakarana Vidwan, Samskritakovida

Senior Research Assistant - Gr - I

Oriental Research Institute

ORIENTAL RESEARCH INSTITUTE

UNIVERSITY OF MYSORE, MYSORE - 570 005

2001

Price : Rs.

First Edition : 2001

© Copy Right

Oriental Research Institute, Mysore

Copies : 1000

Price : Rs. 20=00

Published by
ORIENTAL RESEARCH INSTITUTE
BehindYuvaraja's College
University of Mysore
Mysore - 570 005

SUDHARMA, Samskritha Daily
Mysore - 570 004

Printed at :
SUDHARMA OFFSET PRINTERS
561, 2nd Ramachandra Agrahar
MYSORE - 570 004
Phone : 442835

Price : Rs.20=00

मैसूरुविश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमाला - १९३

श्रीअगस्त्यमुनिविरचितम्

श्रीविद्यामन्त्रभाष्यम्

(सम्पादककृतलक्ष्मीटिप्पणीयुतं च)

RGCSLIB
13435

प्रधानसम्पादकः

डा. के.वि. रमेशः एम्.ए., पिहेच्.डि.

गौरवनिर्देशकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

(भारतीयपुरातत्त्वसर्वेक्षणस्य निवृत्तः संयुक्तमहानिर्देशकः, नवदिल्ली

शासनशास्त्रनिर्देशनालयस्य भूतपूर्वः निर्देशकश्च, मैसूरु)

प्राच्यविद्यासंशोधनालयः, मैसूरु

२००१

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES-193

SRIVIDYAMANTRABHASHYAM

OF

SRIAGASTYAMUNI

(With Editor's Lakshmi Tippani)

General Editor

Dr. K.V. RAMESH M.A., Ph.D.

Honorary Director, Oriental Research Institute
University of Mysore, Mysore
(Retd. Joint Director General
Archaeological Survey of India, New Delhi and
Formerly Director (Epigraphy)
Directorate of Epigraphy, Mysore)

ORIENTAL RESEARCH INSTITUTE
MYSORE - 570 005

2001

मैसूरुविश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमालासंख्या - १९३

श्रीअगस्त्यमुनिविरचितम्

श्रीविद्यामन्त्रभाष्यम्

(सम्पादककृतलक्ष्मीटिप्पणीयुतं च)

सम्पादकः

प्रतिभापटुः, वेदसूक्तविद्यासागरः, वेदविद्यानिधिः

डा. टि. वि. सत्यनारायणः, एम्.ए., पिहेच्.डि.

अलङ्कारव्याकरणशास्त्रविद्वान्, संस्कृतकोविदः

सहायकसंशोधकः-श्रेणिः - १

प्राच्यविद्यासंशोधनालयः, मैसूरु-५

प्राच्यविद्यासंशोधनालयः, मैसूरु-५

२००१

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES-193

SRIVIDYAMANTRABHASHYAM

OF

SRIAGASTYAMUNI

(With Editor's Lakshmi Tippani)

EDITOR

Prathibhapatu, Vedasuktavidyasagara, Vedavidyanidhi

Dr. T.V. Sathyanarayana M.A., Ph.D.

Alankara Vyakaranashastra Vidwan Samskritha Kovida

Senior Research Assistant Gr. I

Oriental Research Institute

ORIENTAL RESEARCH INSTITUTE

MYSORE - 570 005

2001

FOREWORD

Dr. T.V. Satyanarayana needs no introduction to the world of Sanskrit scholars. We in the Oriental Research Institute feel privileged to place in the hands of scholars as well as the interested public the present work of the great sage Agastya, entitled 'Srividyamantra Bhashyam', so very competently edited by Dr. T.V. Satyanarayana with his own learned and critical notes. He has also provided a translation in lucid Kannada for the benefit of the larger public. I am sure this work will be welcomed as a very useful addition in our attempts to understand better the inner significance of the relationship between **mantra** and **tantra.**

I thank Shri K.V. Sampath Kumar of 'SUDHARMA' for offering to publish this work at his expense. The Oriental Research Institute will indeed need the assistance of such lovers of Sanskrit in its endeavour to bring out pending publications.

Dr. K.V. Ramesh
Honorary Director
Oriental Research Institute
Mysore

Date : 12-12-2001

ಶುಭನುಡಿ

ನಮ್ಮ ಸಂಸ್ಥೆಯ ಹಿರಿಯ ವಿದ್ವಾಂಸರೂ, ಪ್ರಿಯಮಿತ್ರರೂ ಆದ ಡಾ. ಟಿ.ವಿ. ಸತ್ಯನಾರಾಯಣ ಅವರು ಸಂಸ್ಕೃತಗ್ರಂಥಸಂಪಾದನೆಯಲ್ಲಿ ಅಪಾರ ಅನುಭವವುಳ್ಳವರಾಗಿದ್ದಾರೆ. ನಮ್ಮ ನಾಡಿನ ಸುಪ್ರಸಿದ್ಧ ವಾಕ್ಪಟುಗಳಲ್ಲಿ ಒಬ್ಬರಾಗಿ ಚಿರಪರಿತರಾಗಿದ್ದಾರೆ. ಅನೇಕ ವಿದ್ವತ್‌ಪೂರ್ಣ ಲೇಖನಗಳನ್ನು ಬರೆದು ಕೀರ್ತಿವಂತರಾಗಿದ್ದಾರೆ. ಸಹೃದಯರೂ ಗುಣಸಂಪನ್ನರೂ ಆದ ಶ್ರೀಯುತರು ವಿನಮ್ರಶಾಲಿಗಳಾಗಿ ಸಂಸ್ಥೆಗೆ ಭೂಷಣಪ್ರಾಯರಾಗಿದ್ದಾರೆ. ಅಪಾರ ಪ್ರತಿಭೆಯುಳ್ಳ ಶ್ರೀಯುತರು ವೇದ, ಜ್ಯೋತಿಷ್ಯ ಮತ್ತು ಆಗಮಗಳನ್ನು ಅಧ್ಯಯನ ಮಾಡಿ, ಅಲಂಕಾರಶಾಸ್ತ್ರ, ವ್ಯಾಕರಣ ಶಾಸ್ತ್ರಗಳಲ್ಲಿ ಪಂಡಿತರಾಗಿದ್ದಾರೆ.

ಶ್ರೀಯುತರು ಮಹರ್ಷಿ ಅಗಸ್ತ್ಯಪ್ರಣೀತ ''ಶ್ರೀವಿದ್ಯಾಮಂತ್ರಭಾಷ್ಯಮ್ ' ಎಂಬ ಗ್ರಂಥವನ್ನು ತುಂಬಾ ಅಚ್ಚುಕಟ್ಟಾಗಿ, ಶಾಸ್ತ್ರೀಯವಾಗಿ ಸಂಪಾದಿಸಿಕೊಟ್ಟಿದ್ದಾರೆ. ಸರಳ ಕನ್ನಡಾನುವಾದವನ್ನು ಮಾಡಿಕೊಟ್ಟು ಸಾರಸ್ವತ ಲೋಕಕ್ಕೆ ಮಹದುಪಕಾರ ಮಾಡಿದ್ದಾರೆ. ಮಂತ್ರ ತಂತ್ರಶಾಸ್ತ್ರಗಳ ಸಂಬಂಧವನ್ನು ತಿಳಿಯಲು ಗ್ರಂಥ ಸಹಕಾರಿಯಾಗಿದೆ. ಈ ಗ್ರಂಥಕ್ಕೆ ಅಪಾರ ಪ್ರಶಂಸೆ ದೊರಕಲಿ ಎಂದು ಹೃದಯ ತುಂಬಿ ಹಾರೈಸುತ್ತೇನೆ.

ಸುಂದರವಾದ ಮುದ್ರಣಕ್ಕೆ ಹೆಸರಾದ **'ಸುಧರ್ಮಾ'** ಸಂಸ್ಕೃತ ದಿನಪತ್ರಿಕೆಯ ಸಂಪಾದಕರಾದ ಶ್ರೀಯುತ ಕೆ.ವಿ. ಸಂಪತ್‌ಕುಮಾರ್ ಅವರಿಗೆ ನನ್ನ ಅಭಿನಂನದೆಗಳು ಸಲ್ಲುತ್ತವೆ.

ಡಾ. ಸಿ.ಎನ್. ಬಸವರಾಜು.ಎಂ.ಎ., ಪಿ.ಹೆಚ್‌ಡಿ.
ಸ್ವತಂತ್ರಪ್ರಭಾರ ಉಪನಿರ್ದೇಶಕರು
ಪ್ರಾಚ್ಯವಿದ್ಯಾ ಸಂಶೋಧನಾಲಯ
ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯ, ಮೈಸೂರು – 5

ದಿನಾಂಕ : 14–12–2001

कृतज्ञतासमर्पणम्

श्रीविद्यामन्त्रभाष्यस्य सम्पादनकर्मणि तत्प्रकाशने च बहु साहाय्यं प्रोत्साहं च दत्तवद्भ्यः श्रीमद्भ्यः अस्माकं प्राच्यविद्या - संशोधनालयस्य गौरवनिर्देशकमहोदयेभ्यः डा. के.वि. रमेश महाभागेभ्यः कृतज्ञतापूर्वकवन्दनानि समर्पयामि । अस्माकं संस्थायाः उपनिर्देशकाः विद्वान् डा. सि.एन्. बसवराजुमहाभागाः अस्य ग्रन्थस्य प्रकाशनकार्ये बहूपकारं दत्तवन्तः। तेभ्यः हार्दं कार्तज्ञ्यं समर्पयामि । अस्य ग्रन्थस्य प्रकाशनं विना मूल्यम् चितरूपेण कृत्वा मुद्रणं च कृत्वा साहित्यिकप्रेम्णा मदीयविश्वासेन च संस्थां प्रति समर्पितवद्भ्यः 'सुधर्मा' संस्कृतदिनपत्रिकायाः सम्पादकेभ्यः के. वि. सम्पतकुमार महाभागेभ्यः कृतज्ञतां समर्पयामि। अमुं ग्रन्थं विना मूल्यम् उचितरूपेण मुद्रणं कृत्वा संस्थां प्रति प्रदातुम् अनुमतिं दत्तवद्भ्यः मैसूरुविश्वविद्यानिलयस्य कुलपतिभ्यः श्री प्राध्यापक एस्. एन्. हेगडेमहोदयेभ्यः कुलसचिवेभ्यः श्री के. शान्तराज्महाभागेभ्यश्च हार्दं कार्तज्ञ्यं समर्पयामि ।

सज्जनविधेयः

डा. टि.वि. सत्यनारायणः

श्रीविद्यामन्त्रभाष्यम्

उपोद्घातः

परमात्मतत्त्वं लोके केचन 'पुरुष' रूपेण अन्ये केचन 'स्त्रीरूपेण' च कथयन्ति । प्रत्यभिज्ञादर्शने शिवः त्रिपुरामते षोडशीदेवी ललिता वैष्णवमते श्रीकृष्णः च एकः अद्वितीयः सच्चिदानन्दस्वरूप इति उपवर्णितम् । परमात्मतत्त्वं यद्यपि भिन्नं भिन्नमस्ति तथापि तद्वस्तु न पुरुषः नापि प्रकृतिः । किन्तु तयोरभेदरूपं सामञ्जस्यमात्रम् । प्रपञ्चे यानि यानि सौन्दर्यस्वरूपाणि सन्ति सर्वाण्यपि तानि अखण्डपरिपूर्णसौन्दर्यस्वरूपस्य कणामात्रं छाया विभूतिर्वा । "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति कठोपनिषद्वचनानुसारात् तस्यैव ज्योतिःप्रकाशनेन सर्वं वस्तुजातमनुप्रकाशितम् । अत एव श्रीविद्यायामुपासनायोग्या ललितादेव्यपि अखण्डस्वरूपतत्त्वरूपिणी वर्तते ।

त्रिपुराविद्या इति श्रीविद्यायाः नामान्तरमस्ति । अस्याः द्वादशोपासकाः लोके विश्रुतास्सन्ति । तदुक्तम् -

मनुश्चन्द्रः कुबेरश्च लोपामुद्रा च मन्मथः ।
अगस्तिरग्निः सूर्यश्च इन्द्रः स्कन्दः शिवस्तथा ॥
क्रोधभट्टारको देव्या द्वादशामी उपासकाः ।

एतेषां मध्ये एकैकस्यापि प्रत्येकं सम्प्रदायः आसीत् ॥ श्रीविद्यायां कादिविद्या हादिविद्या इति भेदद्वयमस्ति । कादिविद्यायाः कामराजविद्या इति नामान्तरम् अस्ति । कामदेवो हि कृच्छ्रतपसा श्रीविद्यादेवीं सन्तोष्य अनेकानपि दुर्लभवरान् लेभे । एवमेव स्वेन उपासितानां कामराजविद्योपासकानां हिताय च बहुशः प्रार्थितवरान् प्राप ।

तदारभ्य कामराजविद्यायाः विशेषप्रचारस्समभवत् । इयं च कामराजविद्या ककारादिपञ्चदशवर्णात्मिका । अत एव एतस्याः 'कादिविद्या' इति नाम ।

लोपामुद्रा हादिविद्यायाः ब्रह्मवादिनी । इयम् ऋग्वेदस्यान्यतमा ऋषिः (ऋग्वेदे १-१७९-१-२) । एषा खलु श्रेष्ठं मुनिम् अगस्त्यं पतित्वेन जग्राह कृच्छ्रतपसा श्रीविद्यां समाराध्य सिद्धिलाभम् अकरोच्च । येन च मन्त्रेण सिद्धिमवाप सा 'लोपामुद्राविद्या' इति नाम्ना प्रथिता । हकारादिपञ्चदशवर्णात्मिकात्वेन सा 'हादिविद्या' इति विश्रुताऽस्ति ।

श्रीविद्यासाधकेषु श्रीविद्यासिद्धेषु अगस्त्यः अन्यतमाचार्यः अस्ति । तेन 'शक्तिसूत्रम्' इत्येको ग्रन्थः रचितोऽस्ति । 'अथातः शक्तिजिज्ञासा' इति हि अस्य प्रथमं सूत्रम् । अगस्त्यः महान् शक्त्युपासकः । अयं वातापील्वलयोः नाशकः । विन्ध्यपर्वतस्य संवर्धननियन्त्रकः समुद्रम् आपोशनं कृत्वा तत्रस्थानां राक्षसानां संहारार्थं देवान् प्रति साहाय्यदायकः कवेरजायाः पतिः तमिळुभाषाजनकः शिवपार्वत्योः कल्याणसमये सकलदेवानामागमनेन उत्तरदिशि भूमिः लम्बिता सती शिवादेशेन दक्षिणदिशमागत्य भूमेः समस्थिति सम्पादकश्च इत्यादिरूपेण पुराणादिषु कथाः श्रूयन्ते ।

हयग्रीवस्य अनुग्रहात् अयमगस्त्यः श्रीविद्यामहिमानं लेभे सिद्धिमवाप इत्यादिकं ललितासहस्रनामादिफलश्रवणादिभिः ज्ञायते । एवमेतादृशः सिद्धिसम्पन्नः अगस्त्य एव अस्य श्रीविद्यामन्त्रभाष्यस्य रचयिता इति ज्ञायते । प्रथमं श्रीविद्यायाः प्रवर्तकः मनुनामकमुनिः । हयग्रीवस्य अनुग्रहेण मनुः श्रीविद्यातत्त्वं रचयामास । श्रीविद्योपासकेषु अन्यतमः अयमगस्त्यः मनुकृत श्रीविद्यातत्त्वं सम्यगवलोक्य त्रयाणां वेदानामध्ययनेन तज्ज्ञानेन च तत्तत्त्वमवगम्य अगस्त्यः श्रीपञ्चदशाक्षरीश्रीविद्यामनुटीकां कृतवानिति अस्य श्रीविद्यामन्त्रभाष्यस्य अन्ते कथितेन पद्येन ज्ञायते तद्यथा -

हयग्रीवाल्लब्ध्वा सकलमिदमाद्यं मनुवरं
कृता टीका तस्य प्रथितमतिनागस्त्यमुनिना ।
कलातत्त्वोद्भासिन्यपरिमितभाग्योदयकरी
त्रयीसारादुद्धृत्य च सदुपकाराय सुधियाम् ॥

इति श्रीमत्परमशिवपरब्रह्मरूपिणा अगस्त्यमुनिना विरचिता श्रुतिसारसमुद्धृता श्रीपञ्चदशाक्षरी श्रीविद्यामनुटीका समाप्तेति ।

सर्वकलासमष्ट्यात्मकश्रीविद्यापरनामिकेयं देवी सकलप्रपञ्च-चैतन्यदायिनी सर्वजगत्संरक्षणी सर्वत्र व्यापिनी अद्वितीया ब्रह्मशक्तिः इत्येवं रूपेण अस्मिन् श्रीविद्याभाष्यग्रन्थे उपवर्णिता ।

व्याकरणांशैरपि तत्र तत्र वाक्यपरिष्कारः कृतोऽस्ति । मन्त्रशास्त्रग्रन्थेषु अयमपूर्वः वर्तते । 'अहं रुद्रेभिः' इत्यादिसूक्तानि ऋग्वेदे कथितानि । तत्र परमात्मशक्तिरियं जगतः समुत्पादना रक्षण-प्रलयकारणभूता सर्वकारणीभूता जगतः चैतन्यस्वरूपिणी च इयमिति सर्वाधारत्वेनोपवर्णिता । तदप्यत्र सूक्ष्मरूपेण सूचितोऽस्ति । मन्त्रतन्त्रशास्त्रस्वरूपोऽयं लघुग्रन्थः मन्त्रतन्त्रशास्त्रोपासकानां पारायणादिकर्मणां परमोपयोगाय भवतीति ज्ञायते ।

ಮುನ್ನುಡಿ

ಜಗತ್ತಿಗೆ ಮೂಲಭೂತವಾದ ಅನಿರ್ವಚನೀಯವಾದ ಶಕ್ತಿಯನ್ನು ಈಶ್ವರ ಶಬ್ದದಿಂದ ಕರೆದಿದ್ದಾರೆ. ಮೊದಮೊದಲು ಈ ಈಶ್ವರನನ್ನು ನಿರಾಕಾರ – ನಿರ್ಗುಣನೆಂದು ಉಪಾಸಿಸಿದರೂ ನಂತರ ಅವನನ್ನು ಸಾಕಾರ' – ಸಗುಣನೆಂದು ಜನರು ಉಪಾಸಿಸಲು ತೊಡಗಿದರು. ಶ್ವೇತಾಶ್ವತರ, ಮಹಾನಾರಾಯಣ, ಅಥರ್ವಶಿರ ಮೊದಲಾದ ಆಧುನಿಕ ಉಪನಿಷತ್ತುಗಳು ಭಕ್ತಿಮತಗಳಿಗೆ ಮೂಲವೆನಿಸಿವೆ. ಈ ಎಲ್ಲ ಉಪನಿಷತ್ತುಗಳಲ್ಲಿ ಪ್ರಾಸಂಗಿಕವಾಗಿ ಸ್ವಸ್ವಾಮಿಭಾವ, ಭೇದಭಾವ, ಶೇಷಶೇಷಿಭಾವಪರವಾದ ಮತ್ತು ಏಕದೇವತೆಯ ಉತ್ಕೃಷ್ಟತೆಯನ್ನು ಪ್ರತಿಪಾದಿಸುವ –

'' ಏಕ ಏವ ರುದ್ರೋ ನ ದ್ವಿತೀಯಾಯ ತಸ್ಥುಃ ''

''ದೇವ ಏಕೋ ನಾರಾಯಣಃ''

'' ಏಕೋ ದೇವಃ ಸರ್ವಭೂತೇಷು ಗೂಢಃ'' – ಮೊದಲಾದ

ವಾಕ್ಯಗಳು ಶೈವ, ವೈಷ್ಣವ, ಶಾಕ್ತ ಕೌಮಾರ ಗಾಣಾಪತ್ಯಮತಗಳಿಗೆ ಆಧಾರಗಳಾದುವು. 'ಭಗ' ಎಂಬುದಕ್ಕೆ ಶ್ರೀ (ಐಶ್ವರ್ಯ), ಕಾಮ (ಇಚ್ಛೆ), ಮಾಹಾತ್ಮ್ಯ (ಮಹಿಮೆ), ವೀರ್ಯ (ಶಕ್ತಿ), ಯತ್ನ (ಪ್ರಯತ್ನ); ಅರ್ಕ (ಸೂರ್ಯ), ಕೀರ್ತಿ (ಯಶಸ್ಸು) ಎಂಬ ಅರ್ಥಗಳಿವೆ. ಹೀಗಾಗಿ 'ಭಾಗವತ' ಎಂಬ ಪದ ಎಲ್ಲ ಮತೀಯರಿಗೂ ಸರಿಹೊಂದುವುದು. ಪತಂಜಲಿಯು ತ್ರಿಶೂಲವನ್ನು ಧರಿಸಿರುವ ಶೈವಭಾಗವತರನ್ನು ಉಲ್ಲೇಖಿಸಿರುವನು. ಬೌದ್ಧರು ಇಸ್ಸಿರಿಯ, ಧರ್ಮ, ಸಿರೀ, ಕಾಮ, ಪಯತನ, ಯಸ ಎಂಬ ಆರುಗುಣಗಳನ್ನುಳ್ಳ ಬುದ್ಧನನ್ನು ''ಭಗವಾನ್'' ಎಂದು ಕರೆಯುತ್ತಾರೆ. ಶಾಕ್ತಮತದವರು, ಜಗದ್ಯೋನಿಯಾದ (ಜಗತ್ತಿಗೆ ಆದಿ ಕಾರಣಳಾದ) ಆದಿಶಕ್ತಿಯನ್ನು ಭಗವತೀ ಎಂದು ಕರೆಯುತ್ತಾರೆ. ವೇದಕಾಲದಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾಗಿದ್ದ ಶ್ರದ್ಧಾ ಮತ್ತು ಉಪಾಸನೆಗಳೇ ಪುರಾಣ ಕಾಲದಲ್ಲಿ ಭಕ್ತಿ ಎನಿಸಿಕೊಂಡವೇ ಹೊರತು ಭಾರತೀಯರ ಭಕ್ತಿ ಪಂಥಗಳು ವಿದೇಶಿಯರ ಸಂಪರ್ಕದಿಂದೇನೂ ಬರಲಿಲ್ಲ. ಭಕ್ತಿಪಂಥಗಳು ಪುರುಷತಂತ್ರಗಳು ಮತ್ತು ಭಾವನಾ ಪ್ರಧಾನಗಳಾದುದರಿಂದ ಷಣ್ಮತಗಳ ಲ್ಲಿಯೂ ಅದ್ವೈತ, ವಿಶಿಷ್ಟಾದ್ವೈತ, ದ್ವೈತ, ದ್ವೈತಾದ್ವೈತ, ಶುದ್ಧಾದ್ವೈತ, ವಿಶೇಷಾದ್ವೈತ, ಭಾವಾದ್ವೈತ, ಅಚಿಂತ್ಯಭೇದಾಭೇದತತ್ತ್ವಗಳು ಸೇರಿಕೊಂಡು ಅನೇಕ ಶಾಖೆಗಳಾಗಿವೆ.

ಶಾಕ್ತಮತ : ಭರತಖಂಡದಲ್ಲಿ ಶಕ್ತಿಪೂಜೆಯು ವೇದಮೂಲವಾಗಿ,

ಬಹುಹಿಂದಿನಿಂದಲೂ ನಡೆದು ಬಂದಿದೆ. ಮಾತೃದೇವತಾಪೂಜೆಯು ಅನಾರ್ಯರದೆಂದೂ ಇದು ಹೊರದೇಶಗಳಿಂದ ಬಂದಿದೆಯೆಂದೂ ವಾದಿಸುವವರೂ ಇದ್ದಾರೆ. ಆದರೆ, ಭಾರತೀಯರು ಮಾಡುವ ಮಾತೃದೇವತಾಪೂಜೆಗೂ ಫ್ರಿಜಿಯ, ಅಸ್ಸಿರಿಯ, ಸುಮೇರಿಯ, ಈಜಿಪ್ಟ್, ಸಿರಿಯದೇಶಗಳ ಐಸಿಸ್, ಕೈಬೆಲೆ, ಮಾ, ಅಮಾ, ಅಸ್ಟಾರ್ಟೆ, ಇಸ್ಟಾರ್, ಮುಂತಾದ ಮಾತೃದೇವತೆಗಳಪೂಜೆಗೂ ಅಜ–ಗಜಾಂತರವ್ಯತ್ಯಾಸವಿದೆ. ಭಾರತೀಯರ ತಂತ್ರಶಾಸ್ತ್ರ ಗ್ರಂಥಗಳೆಲ್ಲವೂ ವೇದ–ಪ್ರಾಮಾಣ್ಯವನ್ನು ಒಪ್ಪಿಕೊಂಡಿವೆ. ಆದರೆ ವಿದೇಶೀಯ ಮಾತೃದೇವತಾಪೂಜೆಯಲ್ಲಿ ದ್ವೈತಭಾವಗಳೂ, ದೇಹದ ಪುನರುತ್ಥಾನ (Resurrection) ತತ್ತ್ವವೂ ಇರುವ ಕಾರಣದಿಂದಲೂ, ಶಾಕ್ತಮತದಲ್ಲಿ ಕರ್ಮ, ಪುನರ್ಜನ್ಮ, ಧರ್ಮ, ಅದ್ವೈತತತ್ತ್ವಗಳಿರುವುದರಿಂದಲೂ ಶಾಕ್ತಮತವು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯಿಂದಲೇ ಕೂಡಿದೆ. ವೇದವಾಙ್ಮಯದಲ್ಲಿ ಮತ್ತು ತಾಂತ್ರಿಕಗ್ರಂಥಗಳಲ್ಲಿ ಶ್ರೀಚಕ್ರ, ಯಂತ್ರ, ಮಂತ್ರ, ನ್ಯಾಸ, ದೀಕ್ಷೆ ಮೊದಲಾದವುಗಳ ವರ್ಣನೆಯು ಕಂಡು ಬರುತ್ತದೆ. ಶ್ರೀಚಕ್ರಮಧ್ಯದಲ್ಲಿ ಇರುವ ಬಿಂದುಮಂಡಲವನ್ನು ಓಡ್ಯಾಣಪೀಠವೆಂದೂ, ತ್ರಿಕೋಣಗಳ ತುದಿಯಲ್ಲಿರುವ ಸ್ಥಾನಗಳಿಗೆ ಪೂರ್ಣಗಿರಿ, ಜಾಲಂಧರ್ ಮತ್ತು ಕಾಮೇಶ್ವರೀ ಪೀಠಗಳೆಂದೂ ಹೆಸರಿಸಿದ್ದಾರೆ. ಭೌತಿಕಸೃಷ್ಟಿ ಪ್ರಪಂಚದಲ್ಲಿ ಓಡ್ಯಾಣಪೀಠವು ವಾಯವ್ಯಪ್ರಾಂತ್ಯದಲ್ಲಿರುವ ಸ್ವಾತಿಕಣಿವೆ ಬಳಿಯ ಓಡ್ಯಾನ್ ಅಥವಾ ಉದ್ಯಾನವೆಂಬ ಸ್ಥಳ. ಈ ಪ್ರದೇಶದಲ್ಲಿ ಯುವಾನ್‌ಚ್ವಾಂಗನ ಸಮಯದಲ್ಲಿ ಅನೇಕ ಶಾಕ್ತರು ನೆಲಸಿದ್ದರು. ಪೂರ್ಣಗಿರಿಪೀಠವು ಉತ್ತರಬದರಿ. ಜಾಲಂಧರ ಪೀಠವು ಪಂಜಾಬಿನ ಜಲಂಧರ್ ಜಿಲ್ಲೆ, ಕಾಮೇಶ್ವರೀ ಪೀಠವು ಕಾಮುಖ್ಯ (ಅಸ್ಸಾಂನ ಗೌಹಾತಿ). ಹೀಗೆ ಪಶ್ಚಿಮದಲ್ಲಿ ಆಫ್‌ಘಾನಿಸ್ಥಾನದಿಂದ ಪೂರ್ವದಲ್ಲಿ ಅಸ್ಸಾಮಿನವರೆಗೂ ಉತ್ತರದಲ್ಲಿ ಬದರಿ ಕೇದಾರದಿಂದ ಜಲಂಧರದವರೆಗೂ ಇರುವ ಉತ್ತರಭಾರತವೇ ಶಾಕ್ತಮತದ ಮೂಲ ಪ್ರದೇಶವೆನ್ನಬಹುದು. ಇಡಾ, ಪಿಂಗಳಾ, ಸುಷುಮ್ನಾ ಎಂದು ಕರೆಯಲ್ಪಡುವ ಗಂಗಾ, ಯಮುನಾ, ಸರಸ್ವತೀ ನದಿಗಳು ಹರಿಯುವ ಆರ್ಯಾವರ್ತವು ಪುಣ್ಯಭೂಮಿ ಎನಿಸಿದೆ. ಇದನ್ನು ಅಮರ ಕೋಶದಲ್ಲಿ "ಆರ್ಯಾವರ್ತಃ ಪುಣ್ಯಭೂಮಿಃ ಮಧ್ಯಂ ವಿಂಧ್ಯ ಹಿಮಾಗಯೋಃ" (ವಿಂಧ್ಯ–ಹಿಮಾಲಯಗಳ ಮಧ್ಯ ದೇಶ) (ಅಮರಕೋಶ 2ನೇ ಕಾಂಡ, ಭೂವರ್ಗ 9ನೇ ಶ್ಲೋಕ) ಎಂದು ತಿಳಿಸಿದೆ.

ಈ ಆರ್ಯಾವರ್ತವು ಹೇಗೆ ವೇದಗಳಿಗೆ ಮೂಲವೋ ಹಾಗೆಯೇ ತಂತ್ರಗಳಿಗೂ ಮೂಲ. ಕ್ರಿ.ಶ. 6 ನೆಯ ಶತಮಾನದ ನಂತರ ಚೀನಾಚಾರ ಮೊದಲಾದ ವಿದೇಶೀಯ ತಾಂತ್ರಿಕಾಚಾರಗಳು ವೈದಿಕ ಮೂಲವಾದ ಶಾಕ್ತಮತದಲ್ಲಿ ಸೇರಿಕೊಂಡವು.

ತಂತ್ರಗಳನ್ನು ವಿಷ್ಣುಕ್ರಾಂತ, ರಥಕ್ರಾಂತ, ಅಶ್ವಕ್ರಾಂತ ಗಳೆಂದು ಮೂರು ಗುಂಪುಗಳಾಗಿ ವಿಂಗಡಿಸಿದೆ. ವಿಷ್ಣುಕ್ರಾಂತತಂತ್ರಗಳು ವಿಂಧ್ಯಪ್ರಾಂತ್ಯದಿಂದ, ಚಟ್ಟಲಾ (Chittagong) ವರೆಗೆ ಪ್ರಚಾರದಲ್ಲಿವೆ. ಅಶ್ವಕ್ರಾಂತತಂತ್ರಗಳು ವಿಂಧ್ಯದಿಂದ ಮಹಾಚೀಣಾದವರೆಗೂ ಹರಡಿವೆ. ರಥಕ್ರಾಂತತಂತ್ರಗಳು ವಿಂಧ್ಯದಿಂದ ಜಾವ, ಕಾಂಬೋಡಿಯ, ಮುಂತಾದ ಬೇರೆ ಬೇರೆ ದ್ವೀಪಗಳಿಗೂ ಪ್ರಚಾರವಾದುವು. ಒಂದೊಂದು ಪ್ರಾಂತ್ಯದಲ್ಲಿಯೂ ಅರವತ್ತನಾಲ್ಕು ಮುಖ್ಯ ತಂತ್ರಗಳಿವೆ.

ಶ್ರೀವಿದ್ಯಾಸಂಪ್ರದಾಯದಲ್ಲಿ ಕಾದಿ (ಅಗಸ್ತ್ಯ) ಹಾದಿ (ಲೋಪಾಮುದ್ರಾ) ಮತ್ತು ಕಹಾದಿ ಎಂಬ ಸಂಪ್ರದಾಯಗಳಿವೆ. ಕಾದಿವಿದ್ಯೆಗೆ ಸಮಯಮಾರ್ಗವೆಂದೂ ಹಾದಿ ವಿದ್ಯೆಗೆ ಕೌಲಮಾರ್ಗವೆಂದೂ ಹೆಸರು. ಈ ಎರಡು ದಾರಿಗಳಲ್ಲೂ ಅಭೇದ ಚಿಂತನವೇ ಮುಖ್ಯವಾದ ಅಂಶ.

ಉದಾ : 1) ಅಹಂದೇವೀ ನ ಚಾನ್ಯೋಽಸ್ಮಿ ಬ್ರಹ್ಮೈವಾಹಂ ನ ಶೋಕಭಾಕ್ ।
ಸಚ್ಚಿದಾನಂದರೂಪೋಽಹಂ ನಿತ್ಯಮುಕ್ತಸ್ವಭಾವವಾನ್ ॥
ತ್ವಮೇವಾಹಮ್ ಅಹಂ ತ್ವಂ ಚ ಸಂವಿನ್ಮಾತ್ರಾವಪುಸ್ತವ ।
ಆವಯೋರಂತರಂ ದೇವಿ ನಶ್ಯತ್ಯಾಜ್ಞಾ ಬಲಾತ್ತತಃ ॥

(ಶ್ರೀವಿದ್ಯಾರ್ಣವ ತಂತ್ರ1.94)

ಹೇ ದೇವಿಯೇ ! ನಾನು ಬ್ರಹ್ಮನೇ ಆಗಿದ್ದೇನೆ. ಬೇರೆಯಲ್ಲ, ನನಗೆ ಯಾವ ದುಃಖಗಳ ಸಂಬಂಧವೂ ಇಲ್ಲ, ನಾನು ಸಚ್ಚಿದಾನಂದಸ್ವರೂಪನು. ನಿತ್ಯಮುಕ್ತಸ್ವಭಾವವುಳ್ಳವನು. ನೀನೇ ನಾನು, ನಾನೇ ನೀನು ಎಂಬುದು ಕೇವಲ ನಿನ್ನ ಶರೀರ ಮಾತ್ರದಿಂದ. ನಮ್ಮಿಬ್ಬರ ಮಧ್ಯದಲ್ಲಿರುವ ಭೇದಭಾವವು ನಿನ್ನ ಆಜ್ಞಾಬಲದಿಂದ ನಾಶವಾಗುತ್ತದೆ.

2) ಕ್ಷಣಂ ಬ್ರಹ್ಮಾಹಮಸ್ಮೀತಿ ಯಃ ಕುರ್ಯಾದಾತ್ಮಚಿಂತನಮ್ ।
ಸ ಸರ್ವಪಾತಕಂ ಹನ್ಯಾತ್ ತಮಃ ಸೂರ್ಯೋದಯೋ ಯಥಾ ॥
ಅದ್ವೈತಂ ಭಾವಯೇನ್ನಿತ್ಯಂ ನ ದ್ವೈತಂ ಗುರುಣಾ ಸಹ ।
ಆತ್ಮವತ್ಸರ್ವಭೂತೇಭ್ಯೋ ಹಿತಂ ಕುರ್ಯಾತ್ ಕುಲೇಶ್ವರಿ ॥

(ಕುಲಾರ್ಣವತಂತ್ರ 9–32. 12.63)

(ಯಾವನು ಕ್ಷಣಕಾಲ ನಾನು ಬ್ರಹ್ಮನಾಗಿದ್ದೇನೆ ಎಂದು ತನ್ನಲ್ಲೇ ಚಿಂತಿಸುತ್ತಾನೋ ಅವನು ಸೂರ್ಯೋದಯವಾದಾಗ ಕತ್ತಲೆಯು ನಾಶವಾದಂತೆ, ಸಕಲ ಪಾಪಗಳನ್ನು ನಾಶ ಮಾಡುತ್ತಾನೆ. ಸದಾ ಕಾಲ ಅದ್ವೈತಭಾವವನ್ನು ಮನಸ್ಸಿನಲ್ಲಿ ಚಿಂತಿಸಬೇಕು.

ಗುರುವಿನ ಜೊತೆ, ದ್ವೈತ ಭಾವವನ್ನು ಚಿಂತಿಸಬಾರದು. ಕುಲೇಶ್ವರಿಯೇ ! ಸಕಲ ಭೂತಗಳನ್ನು ತನ್ನಂತೆ ಕಾಣಬೇಕು). ವೈದಿಕ ಮತಕ್ಕೂ ತಾಂತ್ರಿಕ ಮತಕ್ಕೂ ಉಪಾಸನಾ ಕ್ರಮದಲ್ಲಿ ಮಾತ್ರ ವ್ಯತ್ಯಾಸವಿದೆಯೇ ಹೊರತು, ಇವೆರಡರ ಮೂಲತತ್ತ್ವವು ಒಂದೇ. ತಿಳಿಯದ ಅಜ್ಞರು ತಾಂತ್ರಿಕಾಚಾರಗಳು ಅವೈದಿಕವೆಂದೂ, ಅಶ್ಲೀಲವೆಂದೂ ಹೇಳುವುದಕ್ಕೆ ಅವರ ಅನಭಿಜ್ಞತೆಯೇ ಕಾರಣ.

ಶಾಕ್ತತತ್ತ್ವಗಳು, ಭಾರತೀಯಸಂಸ್ಕೃತಿಯ ಸಮಸ್ತರೂಪಗಳಲ್ಲಿಯೂ ಅಡಕವಾಗಿವೆ. ನಿರ್ಗುಣ ಬ್ರಹ್ಮವಾದಿಗಳಾದ ಶ್ರೀ ಶಂಕರಾಚಾರ್ಯರೇ ಶ್ರೀ ವಿದ್ಯಾ ಉಪಾಸಕರಾಗಿದ್ದರು. ಜೊತೆಗೆ ಅವರು ಪ್ರಪಂಚಸಾರ, ಆನಂದಲಹರೀ, ಸೌಂದರ್ಯಲಹರೀ, ಲಲಿತಾತ್ರಿಶತೀಭಾಷ್ಯ ಮುಂತಾದ ಗ್ರಂಥಗಳನ್ನು ಬರೆದಿದ್ದಾರೆ. ಅಲ್ಲದೆ ಮುಖ್ಯವಾದ ಪೀಠಗಳಲ್ಲಿ ಇವರು ಶ್ರೀಚಕ್ರಯಂತ್ರಸ್ಥಾಪನೆಯನ್ನೂ ಮಾಡಿದ್ದಾರೆ. ಶ್ರೀ ಶಂಕರರ ಗುರುಗಳಾದ ಶ್ರೀ ಗೋವಿಂದಭಗವತ್ಪಾದರು ರಸೇಶ್ವರಮತದಪರವಾಗಿ "ರಸಹೃದಯ"ವೆಂಬ ಗ್ರಂಥವನ್ನು ಬರೆದಿದ್ದಾರೆ. ಗೋವಿಂದ ಭಗವತ್ಪಾದರ ಗುರುಗಳಾದ ಶ್ರೀ ಗೌಡಪಾದರು ಶಕ್ತಿಸೂತ್ರಗಳನ್ನೂ, ಸುಭಗೋದಯ ಮುಂತಾದ ಗ್ರಂಥಗಳನ್ನೂ ರಚಿಸಿರುವರು. ಶ್ರೀ ಪದ್ಮಪಾದರು ಶಂಕರರ "ಪ್ರಪಂಚಸಾರ" ಗ್ರಂಥಕ್ಕೆ ಸಂಸ್ಕೃತ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿರುವರು. ದೇವೀಭಾಗವತ, ಬ್ರಹ್ಮಾಂಡಪುರಾಣ, ಕಾಳಿಕಾಪುರಾಣ, ಮೊದಲಾದ ಶಾಕ್ತಪುರಾಣಗಳಲ್ಲಿ ಹಾಗೂ ಜೈನ–ಬೌದ್ಧ ಮತಗಳಲ್ಲಿಯೂ ಶ್ರೀವಿದ್ಯೋಪಾಸನೆ, ಮಾತೃಕಾಪೂಜೆ, ಯಂತ್ರನಿರ್ಮಾಣ, ಮುಂತಾದ ವಿಷಯಗಳು ಕಂಡು ಬರುತ್ತವೆ. ಜಾವಾ ದ್ವೀಪದಲ್ಲಿ ಅತ್ಯದ್ಭುತವಾದ ಬೋರೋ ಬುದುರ್ ಎಂಬ ದೇವಾಲಯವು ಶ್ರೀಶೈಲೇಂದ್ರರಾಜರಿಂದ ಶ್ರೀಚಕ್ರಪ್ರಸ್ತಾರವನ್ನು ಅನುಸರಿಸಿ ನಿರ್ಮಿತವಾಗಿದೆ. ಶ್ರೀವಿದ್ಯಾಶಂಕರ, ಶ್ರೀ ವಿದ್ಯಾರಣ್ಯರು ಇದೇ ರೀತಿಯಲ್ಲಿ ಶ್ರೀ ವಿದ್ಯಾನಗರವನ್ನು ಶ್ರೀಗಿರಿಯಲ್ಲಿ (ಶೃಂಗೇರಿಯಲ್ಲಿ) ಶ್ರೀವಿದ್ಯಾಶಂಕರರ ಬೃಂದಾವನ ಮತ್ತು ದೇವಾಲಯಗಳನ್ನೂ ನಿರ್ಮಿಸಿದರು. ಶಂಕರಾಚಾರ್ಯರ ಶಿಷ್ಯರಾದ ಶ್ರೀ ಲಕ್ಷ್ಮಣದೇಶಿಕರು "ಶಾರದಾತಿಲಕ" ವೆಂಬ ಗ್ರಂಥವನ್ನು ರಚಿಸಿರುವರು. ಇದಕ್ಕೆ ರಾಘವಭಟ್ಟನು ಕ್ರಿ.ಶ. 1493ರಲ್ಲಿ ಸಂಸ್ಕೃತದಲ್ಲಿ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದಿದ್ದಾನೆ. ಈತನ ಸಮಕಾಲೀನನಾದ ಕೃಷ್ಣಾನಂದ ಆಗಮ ವಾಗೀಶನು "ತಂತ್ರಸಾರ"ವನ್ನು ರಚಿಸಿ ವಂಗದೇಶದಲ್ಲಿ ಶಾಕ್ತಮತವನ್ನು ಪ್ರಬಲ ಮಾಡಿದನು. ಚಂಡೀದಾಸ, ರಾಮಚರಣ ಮೊದಲಾದ ಶಾಕ್ತರು ಬಂಗಾಳಿ ಭಾಷೆಯಲ್ಲಿ ಅನೇಕ ಕೀರ್ತನೆಗಳನ್ನು ರಚಿಸಿದರು. ದಕ್ಷಿಣದೇಶದಲ್ಲಿ ಲಲಿತಾತ್ರಿಪುರಸುಂದರೀ, ರಾಜರಾಜೇಶ್ವರೀ ಉಪಾಸನೆಯು

ವಿಶೇಷವಾಗಿದೆ. ಶ್ರೀಕೃಷ್ಣದೇವರಾಯನ ಕಾಲದಲ್ಲಿ ಲೊಲ್ಲಲಕ್ಷ್ಮೀಧರ, ಡಿಂಡಿಮ ಎಂಬ ಕವಿಗಳು ಶ್ರೀಶಂಕರಾಚಾರ್ಯರಿಂದ ರಚಿತವಾದ ''ಸೌಂದರ್ಯಲಹರೀ''ಗೆ ಸಂಸ್ಕೃತ ವ್ಯಾಖ್ಯಾನವನ್ನು ಬರೆದು ತಮ್ಮ ಸ್ವಂತ ಅನುಭವಗಳನ್ನೂ ಸೂಚಿಸಿದ್ದಾರೆ. ಪೇಶ್ವೆಗಳ ಕಾಲದಲ್ಲಿ ಭಾಸ್ಕರರಾಯನೆಂಬುವವನು (ಕ್ರಿ.ಶ. 1733) ''ಸೇತುಬಂಧ'' ''ಲಲಿತಾಸಹಸ್ರನಾಮಭಾಷ್ಯ''ಮುಂತಾದ ಗ್ರಂಥಗಳನ್ನು ಬರೆದಿದ್ದಾನೆ. ಉಮಾನಂದನಾಥನೆಂಬುವವನು ''ಪರಶುರಾಮಕಲ್ಪಸೂತ್ರ''ಗಳಿಗೆ ಸಂಸ್ಕೃತ ವ್ಯಾಖ್ಯಾನವನ್ನು ರಚಿಸಿದ್ದಾನೆ. ಈಗ ದೇಶದ ಅನೇಕ ಕಡೆ ನಡೆಯುವ ಕರಗ ಉತ್ಸವವು ಶಕ್ತಿ ಪೂಜೆಯ ಚಿಹ್ನೆಯಾಗಿದೆ. ಮಾತೃದೇವತಾ ಪೂಜೆಯಿಂದ ಬ್ರಾಹ್ಮೀಲಿಪಿ, ದೇವನಾಗರೀಲಿಪಿ, ಸಾಹಿತ್ಯ, ಛಂದಸ್ಸು, ಭರತನಾಟ್ಯ ಮೊದಲಾದ ಲಲಿತಕಲೆಗಳು ಹುಟ್ಟಿಕೊಂಡಿವೆ.

ಶ್ರೀವಿದ್ಯೆಯು ಕಾದಿವಿದ್ಯೆ–ಹಾದಿವಿದ್ಯೆ ಎಂದು ಎರಡು ರೂಪದಲ್ಲಿದೆ. ಕಾದಿ ವಿದ್ಯೆಗೆ ಕಾಮರಾಜ ವಿದ್ಯೆ ಎಂದು ಬೇರೊಂದು ಹೆಸರಿದೆ. ಕಾಮದೇವನು ಕಠಿಣವಾದ ತಪಸ್ಸಿನಿಂದ ಶ್ರೀ ವಿದ್ಯಾದೇವಿಯನ್ನು ಸಂತೃಪ್ತಿಪಡಿಸಿ ಅನೇಕ ದುರ್ಲಭ ವರಗಳನ್ನು ಪಡೆದನೆಂದು ಪ್ರತೀತಿ. ಅಲ್ಲದೆ ಲೋಕಹಿತಕ್ಕಾಗಿಯೂ ಅನೇಕ ವರಗಳನ್ನು ಪಡೆದು ಈ ಕಾಮರಾಜವಿದ್ಯೆಯನ್ನು ಪ್ರಚುರಪಡಿಸಿದನು. ಇದು ಕಕಾರಾದಿ ಹದಿನೈದು ವರ್ಣಗಳಿಂದ ಕೂಡಿ 'ಕಾದಿವಿದ್ಯೆ' ಎಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ.

ಹಾದಿವಿದ್ಯೆಯ ಪ್ರವರ್ತಕಳು ಲೋಪಾಮುದ್ರೆ. ಇವಳೂ ಋಗ್ವೇದ ಋಷಿಗಳಲ್ಲಿ ಒಬ್ಬಳಾಗಿದ್ದಾಳೆ. ಶ್ರೇಷ್ಠನಾದ ಅಗಸ್ತ್ಯಮುನಿಯು ಇವಳ ಪತಿ. ಇವಳು ಕಠಿಣತಪಾಚರಣೆಯಿಂದ ಶ್ರೀವಿದ್ಯಾದೇವಿಯನ್ನು ಸಂತೋಷಗೊಳಿಸಿ ಮಂತ್ರ ವಿದ್ಯೆಯನ್ನು ಪಡೆದಳು. ಅಲ್ಲಿಂದ ಇದು ಲೋಪಾಮುದ್ರಾವಿದ್ಯೆ ಎಂದು ಹೆಸರು ಪಡೆಯಿತು. ಇಲ್ಲೂ ಹಕಾರಾದಿ ಹದಿನೈದು ವರ್ಣಗಳ ರೂಪದಲ್ಲಿ ಶ್ರೀ ವಿದ್ಯೆಯು ಉಪದಿಷ್ಟವಾಗಿದೆ.

ಶ್ರೀವಿದ್ಯಾಸಿದ್ಧಿಸಾಧಕರಲ್ಲಿ ಅಗಸ್ತ್ಯರು ಪ್ರಸಿದ್ಧರು. ಇವರು 'ಶಕ್ತಿಸೂತ್ರ' ವೆಂಬ ಗ್ರಂಥವನ್ನು ರಚಿಸಿದ್ದರೆಂದು ಹೇಳುವರು. ಆದರೆ ಅದು ದೊರಕುತ್ತಿಲ್ಲ. ಅಗಸ್ತ್ಯರು ಮಹಾನ್ ಶಕ್ತಿಯ ಉಪಾಸಕರು. ವಾತಾಪಿ ಇಲ್ವಲರೆಂಬ ರಾಕ್ಷಸರನ್ನು ಸಂಹರಿಸಿದವರು. ವಿಂಧ್ಯಪರ್ವತದ ಬೆಳೆಯುವಿಕೆಯನ್ನು ತಡೆದವರು. ಸಮುದ್ರವನ್ನು ಆಪೋಶನ ಮಾಡಿ ಅಲ್ಲಡಗಿದ್ದ ರಾಕ್ಷಸರನ್ನು ದೇವತೆಗಳು ಸಂಹರಿಸುವಂತೆ ಸಹಾಯ ಮಾಡಿದವರು. ಕವೇರಮುನಿಯ ಮಗಳಾದ ಕಾವೇರಿಯನ್ನು ಹೆಂಡತಿಯನ್ನಾಗಿ

ಪಡೆದು ಅವಳು ನದೀ ರೂಪದಲ್ಲಿಹರಿಯಲು ಕಾರಣರಾದವರು. ಶಿವಪಾರ್ವತಿಯರ ವಿವಾಹಕಾಲದಲ್ಲಿ ದೇವ–ದೇವತಾದಿಗಳೆಲ್ಲ ಉತ್ತರದ ಹಿಮಾಲಯದಲ್ಲಿ ಸೇರಿದಾಗ ಭೂಮಿಯು ವಾಲಿ ಅಲುಗಾಡಲು ತೊಡಗಿದಾಗ ಶಿವನ ಅಪ್ಪಣೆಯಂತೆ ದಕ್ಷಿಣದಿಕ್ಕಿಗೆ ಪತ್ನೀಸಹಿತಬಂದು ಭೂಮಿಯನ್ನು ಸಮಸ್ಥಿತಿಗೆ ತಂದವರು. ತಮಿಳು ಭಾಷೆಯ ಜನಕರೆಂದೂ ಪ್ರಸಿದ್ಧಿಪಡೆದಿದ್ದಾರೆ. ಇವೆಲ್ಲವೂ ಪುರಾಣಾದಿಗಳಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾಗಿವೆ.

ಇವರು ಹಯಗ್ರೀವನ ಅನುಗ್ರಹದಿಂದ ಶ್ರೀವಿದ್ಯೆಯ ಮಹಿಮೆಗಳನ್ನೆಲ್ಲಾ ಪಡೆದರೆಂದು ಲಲಿತಾಸಹಸ್ರನಾಮಭಾಷ್ಯ ಮುಂತಾದ ಗ್ರಂಥಗಳಲ್ಲಿ ಉದ್ಧೃತವಾಗಿದೆ.

ಈ ಅಗಸ್ತ್ಯಮುನಿಗಳು ಈ 'ಶ್ರೀವಿದ್ಯಾಮಂತ್ರಭಾಷ್ಯಗ್ರಂಥವನ್ನು ರಚಿಸಿದವರು. ಶ್ರೀ ವಿದ್ಯಾಸಿದ್ಧಿಯನ್ನು ಪಡೆದು ತತ್ಸಂಬಂಧ ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿದವರಲ್ಲಿ ಮನು ಎಂಬ ಮುನಿಯು ಮೊದಲಿಗನು. ಅವನಿಂದ ರಚಿತವಾದ ಶ್ರೀವಿದ್ಯಾತತ್ತ್ವವನ್ನು ತಿಳಿದು ಈ ಶ್ರೀವಿದ್ಯಾಮಂತ್ರ ಭಾಷ್ಯವೆಂಬ ಟೀಕಾ ಗ್ರಂಥವನ್ನು ರಚಿಸಿದ್ದಾರೆ. ಮೂರು ವೇದಗಳಲ್ಲೂ ವ್ಯಾಪಿಸಿರುವ ಶ್ರೀವಿದ್ಯಾತತ್ತ್ವವನ್ನು ಸಂಗ್ರಹಿಸಿ ಈ ಚಿಕ್ಕ ಗ್ರಂಥವನ್ನು ವಿರಚಿಸಿದ್ದಾರೆ.

ಅಲ್ಲಲ್ಲಿ ವ್ಯಾಕರಣಾಂಶಗಳನ್ನು ನೀಡಿ ವಾಕ್ಯ ಪರಿಷ್ಕಾರವನ್ನು ಮಾಡಲಾಗಿದೆ. ಮಂತ್ರಶಾಸ್ತ್ರ ಗ್ರಂಥಗಳಲ್ಲಿ ಇದೊಂದು ಅಪೂರ್ವವಾದ ಕೃತಿ. ''ಅಹಂ ರುದ್ರೇಭಿಃ' ಮೊದಲಾದ ಸೂಕ್ತಗಳಲ್ಲಿ ಜಗತ್ತಿಗೆ ನಾನೇ ಮೂಲಕಾರಣಗಳು ಎಂದು ದೇವಿ ಹೇಳಿಕೊಳ್ಳುವ ಅಂಶಗಳಿವೆ. ಸೃಷ್ಟಿಸ್ಥಿತಿ–ಲಯಗಳಿಗೆ ಮೂಲಕಾರಣಗಳು ದೇವಿ. ಅವಳೇ ಎಲ್ಲದಕ್ಕೂ ಆಧಾರಳು ಎಂದು ಹೇಳಲಾಗಿದೆ. ಆ ಅಂಶವನ್ನು ಇಲ್ಲಿಸೂಕ್ಷ್ಮವಾಗಿ ತಿಳಿಸಲಾಗಿದೆ.

ಸರ್ವಕಲಾ ಪರಿಪೂರ್ಣಳಾದ ಶ್ರೀವಿದ್ಯಾಎಂಬ ಬೇರೊಂದು ಹೆಸರಿನಿಂದ ಪ್ರಸಿದ್ಧಳಾದ ದೇವಿಯು ಈ ಸಕಲ ಪ್ರಪಂಚಕ್ಕೆ ಚೈತನ್ಯದಾಯಿನಿಯಾಗಿದ್ದಾಳೆ. ಸಕಲಜಗದ್ರಕ್ಷಕಿ ಇವಳು. ಅದ್ವಿತೀಯಳಾದ ಬ್ರಹ್ಮಶಕ್ತಿ ಈ ದೇವಿ ಎಂದು ಸಂಕ್ಷೇಪವಾಗಿ ಸೂತ್ರರೂಪದಲ್ಲಿ ಈ ಗ್ರಂಥದಲ್ಲಿ ತಿಳಿಸಲಾಗಿದೆ. ಮಂತ್ರ ತಂತ್ರ ಶಾಸ್ತ್ರ ಉಪಾಸಕರಿಗೆ ಈ ಪುಟ್ಟ ಗ್ರಂಥವು ಪಾರಾಯಣಾದಿಕ್ರಮಕ್ಕೆ ಬಹು ಉಪಕಾರಕವಾಗಿದೆ.

श्रीविद्यामन्त्रभाष्यमातृकाविवरणम्

अगस्त्यकृत श्रीविद्यामन्त्रभाष्यग्रन्थस्य सम्पादनार्थं पञ्च मातृकाः स्वीकृतास्सन्ति । तासु चतस्रः कर्गजपत्रमय्यः। एका ताळपत्रमयी। एताः पञ्च मातृकाः अवलोक्य ग्रन्थोऽयं सम्पादितः सज्जीकृतश्च । तासां मातृकाणां स्वरूपमेवमस्ति ।

१. श्रीविद्यामन्त्रभाष्यम् - संख्या - ए . ११५। कन्नडलिपिः । कर्गजपत्रात्मिका। २१ पुटानि सन्ति। समग्रा अस्ति । दत्त सङ्केतः-क।

२. श्रीविद्यामन्त्रमन्त्रभाष्यम् । संख्या बि. - ६०३। कन्नडलिपिः। कर्गंजपत्रात्मिका । ५ पत्राणि सन्ति। नन्दिनागरीलिपिः । समग्रा अस्ति । दत्तः सङ्केतः- ख।

३. श्रीविद्यामन्त्रभाष्यम् - कन्नडलिपिः । संख्या-बि. ६९८ । कर्गजपत्रात्मिका । षट् पत्राणि । समग्रा अस्ति । दत्तः सङ्केतः-ग ।

४. श्रीविद्यामन्त्रमन्त्रभाष्यम् । संख्या बि.-३४०। कन्नडलिपिः कर्गजपत्रात्मिका । १८ पुटानि । कन्नडलिपिः । समग्रा अस्ति । दत्तः सङ्केतः- घ ।

५. श्रीविद्यामन्त्रमन्त्रभाष्यम् । संख्या पि. -२०६३ । आन्ध्रलिपिः। ताळपत्रमयी । १० पत्राणि सन्ति । समग्रा अस्ति । दत्तः सङ्केतः - च ।

एताः पञ्च मातृकाः मैसूरुप्राच्यविद्यासंशोधनालये विद्यन्ते ।

श्रीविद्यामन्त्रभाष्यम्

(अगस्त्यमुनिविरचितम्)

(सम्पादककृतलक्ष्मीटिप्पणीसहितम्)

श्रीगुरवे नमः

* ज्ञानान्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥
वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युः तं नमामि गजाननम् ॥
द्वैताद्वैतमहामोहविघ्नसन्तानमर्दिनीम् ।
गणनाथमयीं वन्दे प्रतिभापरमेश्वरीम् ॥

हरिः ओम्

तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं
यज्ञपतये। दैवी स्वस्तिरस्तु नः स्वस्ति-
र्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजं शं नो
अस्तु द्विपदे शं चतुष्पदे ॥
ओम् शान्तिः शान्तिः शान्तिः

हरिः ओम्

ज्ञानानन्दमयम् इत्यारभ्य शान्तिः हरिः ओम् इत्यन्तो भागः ख,ग,च मातृकासु नास्ति । 'ख' मातृकायां 'श्रीहयग्रीवाय नमः 'इह खलु' इति ग्रन्थभागः आरभ्यते। 'घ' मातृकायां 'शुभमस्तु' 'श्रीललिताम्बिकायै नमः' इह खलु' इति ग्रन्थभागः समारभ्यते। ज्ञानानन्दमयम् इत्यादिश्लोकाः परम्परागताः लिपिकारेण लिखिताः इति विभावनीयम् ।

इह खलु भगवान् सकलविद्यानिधिः बहुविधशाखामय-ऋग्यजुस्सा[१]ममूर्तिरपरिच्छिन्नचिच्छक्तिस[२]मावेशतरङ्गित[३]हृदयः श्रीहयग्रीवरूपी श्री[४]महाविष्णुः सर्वज्ञानतपोनिधये परसच्चिदानन्द- घनचिच्छक्तिस्वरूपं पृष्टवते अगस्त्याय महामुनये [५]अनेकविधानाम् [६]ऋग्यजुस्सामशाखानाम् अनेकविधासु उपनिषत्सु तत्र तत्र विद्यमानरहस्यार्थावबोधस्य दुरवगाहत्वात् तदर्थावबो[७]धेनैव परतत्त्वस्य [८]प्रकाश्यमानत्वात् तत्र तत्र मन्त्रेषु एकैकस्मिन् [९]एकैकस्यैव पुरुषार्थस्य विद्यमानत्वात् [१०]आगमानामप्यनेकविधत्वेन चर्या-क्रिया-ज्ञान-योगानामपि दुरवगाहत्वात् तज्ज्ञानेनैव तत्त्वावबोधस्य सुलभगम्यत्वात् [११]सकलश्रुतिस्मृतिपुराणेतिहाससारभूतां सकलागमोक्तचर्याक्रियाज्ञानयोग सारभूतां गन्धद्वाराम् - आवहन्ती - चत्वारिवाक् - चित्रावसो इत्यादिसूक्तोपनिषन्मन्त्रैः यजुश्शाखाभिरत्यन्तगूढतया प्रबोधिताम् ऋक्शाखाभिः

---

१. समवेदमूर्तिरपरः चिच्छक्तिसमावेशतरङ्गितहयग्रीवरूपी महाविष्णुः सकलज्ञानतपोनिधये सच्चिदानन्द - च

२. समावेशितहृदयो हयग्रीवरूपी - ख

३. हृदयो हयग्रीवरूपी महाविष्णुः - ग

४. महाविष्णुः - घ

५. अनेकविधशाखामयानाम् ऋग्यजुस् - च

६. ऋग्यजुस्सामनामकोऽनेकविधासु - ख, ग

७. बोधनेनैव - च

८. प्रकाशमानत्वात् - घ, च

९. एकैकस्य पुरुषार्थस्य - च

१०. आगमनाम् अनेकविधत्वेन - क

११. i) सकलश्रुतिस्मृतिपुराणसारभूताम् - क

ii) सकलस्मृतिपुराणसारभूताम् - ख. घ

अहं रुद्रेभिः - पवमान शंन - [1]इत्यादिभिः सूक्तशस्त्रादिभिः बहुविधसामभिः यज्ञायज्ञीय - श्रायन्तीय - बृहद्रथन्तर - वाचोव्रत- दे[2]वव्रत-पुरुषव्रतज्येष्ठसामादिभिः स्तोभनि[3]धनादिभिः विशेषेण अत्यन्तरहस्यतया प्रकाश्यमानां च[4] सकलवेदसाधारणीं सकलवेदमन्त्र ब्राह्मणोपनिषत्सारभूतां सच्चिदानन्द[5]परब्रह्मप्रकाशसाक्षात्कारिणीं ब्रह्मश्रीविद्यां पञ्चदशसु [6]वर्णेष्वपि प्रतिवर्णं [7]तत्तद्रहस्यार्थप्रकाशिनीं, सकलपुरुषार्थसाधनत्वेनाभिमतां सकलपुरुषार्थप्रत्यक्षप्रकाशिनीं श्रीविद्यामुपदिशति [8]क ए इति ।

[9]कन-दीप्तौ इत्यस्मात् कन्यन्ते [10]प्रकाश्यन्ते अनेन [11]शब्दार्थजालानि इति कनतीति वा क ।

कनतेः उणादयो बहुलम् इति बहुलग्रहणात् डः । स्वरादित्वात् अव्ययम् । आर्षत्वात् प्रगृह्यत्वेन प्रकृतिभावः ।

ए-[12]इक्स्मरणे इत्यस्माद्धातोः [13]इङ् अध्ययने इत्यस्माद्वा औणादिको

---

१. इत्यादिसूक्तशस्त्रमन्त्रोपनिषद्भिरतिनिगूढतया प्रकाश्मानां निधनहरि श्रीनिधनादिभिः प्रकाश्यमानां बहुविधसामभिः यज्ञायज्ञिय - च

२. i) देवपुरुषव्रत - घ ii) देवव्रतपुरुषसूक्तज्येष्ठ - ख

३. निधनादिविशेषेण - च ४. ख-मातृकायां चकारः नास्ति ।

५. परब्रह्मसाक्षात्कारिणीं ब्रह्मविद्यां पञ्चदशसु वर्णेष्वेव प्रतिवर्णेष्वपि रहस्यार्थप्रकाशिनीम्- च

६. वर्णेष्वेव प्रतिवर्णम् - क ७. तत्तद्रहस्यार्थतत्त्वप्रकाशिनीम् - ख, घ

८. क- इति - क ९. कनी - दीप्तिकान्तिगतिषु - इति धातुः अदादिः ।

१०. काश्यन्ते - ख

११. शब्दार्थजालानि इति वा कनयतीति वा कनतेः क्विप् । उणादयो बहुलम् इति बहुलग्रहणात् प्राप्तः । स्वरादित्वात् अव्ययम् क ए - च

१२. इक् स्मरणे इत्यदादिः १३. इङ् - अध्ययने इति धातुः अदादिः

[1]विच् प्रत्ययः ।

[2]सार्वधातुकार्धधातुकयोरिति गुणः । चकारस्य [3]**हलन्त्यम्** इति इत्संज्ञायां [4]**तस्य लोपः** इति लोपः । इकार उच्चारणार्थः । [5]**वेरपृक्तस्य** इति वलोपः । [6]**निपात एकाजनाङ्** इति प्रगृह्यत्वेन [7]प्रकृतिभावः । [8]ईयन्ते स्मर्यन्ते अधीयते वा [9]सर्वविद शास्त्रादिकला अनेनेति ए । क च तत् पुनः पुनः प्रकाशमानबुद्धिरित्यर्थः ।

[10]ईयते व्याप्यते इति ई । ई-व्याप्तौ इत्यस्मात् क्विपि निपातत्वात् प्रकृतिभावः । पुनः पुनः प्रकाश्यमान[11]बुद्धिव्यापिनीलहरी इति यावत् । लहरीत्यत्र परोक्षतया लह्रीत्युक्तम् । **परोक्षप्रिया इव हि देवाः** इति [12]श्रुतेः। [13]कएईलह्रीं तद्युक्ता वाग्भवा परानपेक्षं यथा तथा स्वयमेव अवबोधिनी इत्यर्थः ।

क ए ई लह्रीम् । अनेन धर्माख्यपुरुषार्थसाधनब्रह्मवर्चससमृद्धि-निर्मितिरुक्ता। तस्मादेव वाग्भवमुच्यते । [14]वाग्जालप्रवृत्तिनिमित्तत्वात् । अनेन ब्राह्मणैरुपास्यमानगायत्री[15]मन्त्रसार उक्तः। इष्टदेवताप्रशंसनात्मकत्वेन

---

१. i) विङ्प्रत्ययः - क ii) इच् प्रत्ययः - च २. ७-३-८४ अ.सू.पा.

३. १-३-३ (अ.सू.पा.) ४. १-३-९ (अ.सू.पा.) ५. ६-१-६७ (अ.सू.पा.)

६. १.१.२४ (अ.सू.पा) ७. ६-१-१२५ (अ.सू.पा) ८. ईयते स्मर्यते अधीयते वा-क

९. सर्वाणि वेदशास्त्राणि कला अनेनेति ए - च , सर्वविदशास्त्रादिकामनेनेति - घ.

१०. ई-व्याप्तौ इत्यस्मात् क्विप् । पुनः पुनः - क

११. बुद्धिरिति यावत् । लह्री लहरी - घ ii) बुद्धिव्यापनम् इति - क

१२. इति श्रुतेः इत्यनन्तरं कए ईलह्राम् इत्यतः पूर्वं 'ग' मातृकायाम् पुनः पुनः प्रकाशमानबुद्धिव्यापिनी लहरी कएईलह्री । मीयते इति म् । माङ्माने शब्दे च इत्यस्मात् क्विप् परोक्षश्रुत्या लुप्ताकारत्वेन गृह्यते । मिमीतेरपीति श्रुतेः । कएइलह्र्याम् एतद्युक्ता वाग्भवा । परानपेक्षं यथा तथा स्वयमेवावबोधिनी इत्यर्थः इति दृश्यते ।

१३. क ए ई लह्रीं - च १४. वाप्रवृत्तिजालनिमित्तत्वात् - ख,ग,घ

१५. मन्त्रसाधनत्वमुक्तम् - च

[१]वाग्जालप्रवृत्तत्वात् ऋग्वेदात्मकत्वम्। [२]हन्यन्ते अनेन ऐहिकामुष्मिकतापत्रयाणि इति ह । [३]हन - हिंसागत्योरित्यस्मात् क्विप्। अन्तलोपः औणादिकः । अनेन शत्रुरोगाद्यैहिकपञ्चबाधानिवृत्तिः । दुष्कृतजन्यामुष्मिकबाधानिवृत्तिश्चोक्ता । [४]सीयन्ते उपभुज्यन्ते अनेन [५]सर्वधन [६]कनकवस्तुवाहन भूम्यादिसंपत्प्र[७]चया इति [८]सः ।

स - प्रत्यवासानार्थत्वात् [९]सनोतेर्वा स्यतेः वा च्विप्रत्यये कृते बाहुल्येन लुप्तान्त्यवर्णत्वेन गृहीतः । अनेन सकलराजपरिच्छदमुक्तम् ।

काम्यन्ते अनेन स्रक्चन्दन [१०]वनितादिमदनविषयभोगा इति क । [११]कमु-कान्तौ इत्यस्मात् पूर्ववत् प्रक्रिया । अनेन सकलैहिकामुष्मिक-विषयभोगः उक्तः।

ह च स च क च हसकाः । हीयते प्राप्यते इति ह । [१२]ओहाङ् -गतौ इत्यस्माद्धातोः *आतोऽनुपसर्गे कः । [१३]हसकानां हः हसकह । उपद्रवनिवृत्यर्थसञ्चयकामभोगावाप्तिरिति यावत् । तस्याः लह्री आधिक्यम्।

[१४]ईश्यते प्रकाश्यते अनेन दिगन्तेषु कीर्तिजालम् इति ई । ईश-ऐश्वर्ये इत्यस्मात् [१५] क्विप् ।

---

१. वाग्जालप्रवर्तकत्वात् - च

२. हन्यन्ते अनेन इति पदद्वयं 'ख' मातृकायां नास्ति ।

३. हन्धातुः -अदादिः । ४. नीयन्ते - ख ५. सर्वे धन - च

६. कनकवाहनवस्तुभूम्यादि - क ७. प्रचय इति प्रत्यवसानार्थात् - घ

८. i) सा - प्रत्यव - ग ii) स - प्रत्यवसानार्थत्वात् - ख

९. सनतेर्विच्प्रत्यये - क १०. वनितादिविषय - क

११. धातुः भ्वादिः । कान्तिरिच्छा इत्यर्थः ।

१२. धातुः जुहोत्यादिः १३. हसकानां हः उपद्रव -च *३-२-३ (अ.सू.पा.)

१४. ईयते - च

१५. क्विप् - हसकहलह्रीं च ई च सवर्णदीर्घः । हसकहलह्री - च

बाहुलकात् अन्त्यलोप: । हसकलहह्रीश्च ईश्च अनयोस्सवर्णदीर्घ: । [१]हसकहलह्रिय: । तासां निर्माणं हसकलह्रीम् । अनेन अर्थकामपुरुषार्थद्वयनिर्मितिरुक्ता, । तस्मादेव कामराजत्वम् । अनेन क्षत्रियवर्णोपास्यमानत्रिष्टुप्छन्दस्सारत्वम् उक्तम् ।

स्वकीयाभीष्ट[२]साधनकर्मजातविधायकत्वात् यजुर्वेदस्य अर्थकामयो: क्रियासाध्यत्वात् यजुर्वेदात्मकत्वम् । सकलाभि: कलाभिरवयवै: शिवादितत्त्वैर्वा सहिता सकला । [३]कलाभि: [४]चतु:षष्टिभि: विद्याभिर्वा सहिता सकला । अथवा सम्यक् [५]कलयतीति सकला । [६]हृञ्-हरण इत्यस्माद्धातो: हरति [७]सर्वं जगत् अन्त्यकाल इति व्युत्पत्त्या [८]'अत इञ्' इति इनिप्रत्यय: । बाहुल्यात् गुणाभावेन यणादेश: । ह्री[९] संहृतिशक्ति: ।

[१०]इन्यते प्रकाश्यते सर्वं जगदनेन इति ई [११] सृष्टिशक्ति: । [१२]इदि-परमैश्वर्ये इत्यस्मात् क्विप् व्यञ्जनलोपश्च । सर्वेषां [१३]नियन्तृत्वे वर्तत इति[१४] स्थितिशक्ति:। ह्री[१५] च ई च सरूपत्वादेकशेष: । ह्री संहृतिसृष्टिस्थितिशक्ति: ।

---

१. हसकलह्री च प्रत्यय: तासां - ख । २. साधककर्म - च

३. सकलाभि: - घ ४. चतु:षष्टिकलाभिर्विद्याभिर्वा सहिता - घ, च

५. कलयतीति वा सकला - च

६. धातु: भ्वादि; । हरणं प्रापणं स्वीकार: स्तेयं नाशनं च ।

७. सर्वम् अन्त्यकाल इति - च ८. ४-१-९५ (अ.सू.पा)

९. ह्रि: संहृतिशक्ति: - क

१०. i) ईप्यते प्रकाश्यते - ग ii) ईयते प्रकाश्यते - च

११. सृष्टिशक्ति: ह्रीश्च ईच अकस्सवर्णे दीर्घ: ह्री - इदि - ग

१२. इदि-परमैश्वर्ये इति धातु: भ्वादि: - इन्दति इति रूपम् ।

१३. नियन्तृत्वेन वर्तते - ग, च १४. इति इ: ह्रिश्च ई च इश्च सवर्णदीर्घ: - ह्री

१५. ह्रीश्च ईच - घ, ख

अथवा विहरति सकलप्रपञ्च[1]रूपिणीति ह्रिः । विहरणार्थाद्धरतेः [2]इच् प्रत्ययः। हरिरूपेण इन्दति परमनियन्तृत्वेन [3]वर्तते इति ह्री । अथवा [4]ह इति क्विन्तः । [5]लुप्तककारशब्दः प्रपञ्चसंहृतिवाचकः । ई [6]प्रकाशक इत्यात्मैक्यगमनम् । सवर्णदीर्घयणादेशश्च । सकलप्रपञ्चदेहेन्द्रियादिकमूरीकृत्य अनिर्वचनीयप्रकाशरूपात्मैक्यगमकम् इत्यर्थः । अथवा हृत्पुण्डरीकमध्ये सुषिरान्तरदहराकाशेवर्तमानमहाकाशान्तर्गतातिसूक्ष्माति[7]प्रकाशात्मस्थानगत दीपशिखा । [8]श्रुतिः-**तस्यान्ते सुषिरगँ सूक्ष्मम्** इत्युपक्रम्य **तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः** इति नारायणोपनिषदुक्त[9]प्रकारेत्यर्थः । सकला च [10]सा ह्रीश्च सकलह्रीः । [11]इषु-इच्छायाम् इत्यस्माद्धातोः इष्यते [12]अत्यन्ताभीष्टदत्वेन सर्वैः ईशविष्ण्वादिस्तम्बपर्यन्तैः चेतनवर्गैः काङ्क्ष्यत इति [13]ह्री। **इष्वसिभ्यां क्विप्** । व्यञ्जनलोपश्च । निरतिशयानन्तसत्यानन्दनैरन्तर्यम् । [14]ई पाहि मे मतो ह वा पादेषूत्तरेष्विति श्रुतेः । [15]तस्याः प्रमितिः मा लुप्ताकारो मकारो गृह्यते । मिमीतेर्वा मिनोतेर्हवा इदं [16]सर्वमपीति च । उभयत्र श्रुतिः । म्

---

१. रूपेणेति हरिः । विहरणार्थात्-ग,ख

२. इन् प्रत्ययः-घ, ख ३. वर्तते इति अथवा -क

४. ह्री इति-च. ५. लुप्तकारशब्दः-ग, घ, च, ख

६. ईप्रकाशः आत्मैक्यगमनं यणादेशः । सकलप्रपञ्च देहेन्द्रियादिकं द्रवीकृत्य-क.

७. प्रकाशात्मकस्थानोर्ध्वगत-च ८. श्रुतिरिति पदं- घ. ख. मातृकयोः नास्ति ।

९. i) प्रकारेणेत्यर्थः - ग, घ, ख, ii) प्रकारेत्ययं सकला-च

१०. सा ह्री च सकलह्री-क . ११. धातुः तुदादिः । इच्छायामर्थे धातुरस्ति ।

१२. i) अन्त्यन्ताभीष्टत्त्वेन - ग, ख ii) अत्यन्तीभीष्टत्वेन - च

१३. इति। इ क्विप् - क ii) इति ई इष्युषिभ्यां क्विप् - च, ख

१४. i) ईं हि मतोत्तरपादेषूत्तरेष्विति - घ ii) इषिमवतो पादेषु उत्तरेष्विति - च

१५. i) तस्याः मितिः मा - च ii). तस्याः प्रमितिः लुप्ताकारो - क

१६. मपीति च भवतीति श्रुतेः ई इति नादानुकरणम् अव्ययम् - च

इति नादानुकरणशब्दः । अव्ययम् । प्रमितिर्नाम यथार्थानुभवः । अनेन [१]परब्रह्मणः चिच्छक्तिरुच्यते । नादस्य शुद्धचैतन्यस्य स्थूलरूपत्वात् [२]शुद्धचैतन्यात्मकचिच्छ[३]क्तिस्तु उन्मनीनादादिभ्योऽप्यतीतत्वात् अवाङ्मानसगोचरा । [४]मिनोतीति हि नादस्सर्वमात्मनि [५]तादात्म्येन निरतिशयसत्यानन्दानुभवप्रकाशकनादा त्मकचिच्छक्तिरित्यर्थः । तत्र खलु सर्वे प्रपञ्चा मीयन्ते सृज्यन्ते च ।

[६]एतच्चतुर्थखण्डः सकलह्रीं [७]रूपं ईं च सकलह्रीम् । अथवा ह्रीं च तत् ईं च ह्रीम् । सकलं च तत् ह्रीं च सकलह्रीम् । [८]सकलहृदयाकाशदीप शिखान्तर्गतसर्वतत्त्वाधिष्ठातृनिरतिशयसत्यानन्तानन्दानुंभवप्रकाशनादात्म कचिच्छक्तिः । अनेन मोक्षसाधननादलययोगानन्दानुभव [९]उक्तः । [१०]चित्तवृत्तिनिरोधप्रधानत्वात् वैश्यजात्युपास्यमान जगतीछन्दस्सारः उक्तः। सामवेदस्य गानप्राधान्येन नादविलीनचित्तत्वादत्र च नादलययोगस्य [११]उपवर्णितत्वाच्च सामवेदात्मकम् ।

अस्य मन्त्रस्य एवमर्थः -

[१२]क एई लह्रीं च हसकहलह्रीं च सम्यक् कलयतामिति क ए ई लह्रीम् ।

---

१. i) परब्रह्मचिच्छक्तिः - क ii). परब्रह्मभक्तिरुच्यते - ग

२. शुद्धचैतन्यात्मसु उन्मनीनादादिभ्यो वृत्तित्वात् अनन्तानन्दानुभवगोचरा - ग, शुद्धचैतन्यात्मकचिच्छक्तिस्तु उन्मनीनादादिभ्यः - घ

३. शक्तिमनोन्मनी - च

४. मिनोति हि - क

५. तादात्म्येन ईं निरतिशय - च

६. एतच्चतुर्थः खण्डः - ख

७. रूपं सकलह्रीम् - क

८. सकलहृदाकाश - क

९. उक्तः । तस्माज्जगतीछन्दस्सार उक्तः - ख

१०. चित्तवृत्तिमेधाप्रधानत्वात् - क

११. जपवर्णितत्वाच्च - ग

१२. कएई ईलह्रीं च हसकलह्रीं च वा सकलह्रीं च सम्यक् कलयतामिति क ए ई लह्रींह सकलह्रीं - ग, घ, च

[1]हसकहलह्रीं सकलं क एईलह्रीं सकलं कएईलह्रीं हसकहलह्रीं सकलं च तत् ह्रीं च कएईलह्रीं हसकहलह्रीं सकलह्रीम् इत्येवमर्थः।

उत्तरोत्तरप्रकाशबुद्धि[2]व्यापनातिशयवाग्वृत्त्यनिष्टनिवारण भोगभाग्याभिवृद्ध्यतिशयकीर्तिजालजनकदहरान्तर्गतदीपशिखान्तर्गत [3]सर्वतत्त्वाधिष्ठातृनि[4]रतिशयानन्दसंविदनुभवप्रकाशनादातीत चिच्छक्तिरिति।

सामवेदस्य हकारस्तोभाक्षर[5]प्राचुर्येण निधनस्तोभप्रधानत्वेन च अस्य मन्त्रस्य सामवेदात्मकत्वम्। [6]हकारप्राचुर्यात् नादरूप[7]निदान [8]प्राधान्याच्च सामवेदात्मकत्वम्।

"सामवेदो ब्राह्मणानां प्रसूतिः" इति श्रुत्या [9]ब्राह्मणानामेवा[10]वश्यकोपासकत्वं पुराणागमादिष्वङ्गीकृतत्वात् [11]इतरवर्णानामपि उपासकत्वम्। अतः चतुर्वर्णानामपि साधारणं नान्येषाम्। [12]एतन्मन्त्रमननशीलानां

---

१. हसकलह्रीं सकलह्रीम् इत्येवमर्थः - ख २. व्यापनातिशयव्यापकवृत्त्यनिष्ट - क

३. i) सर्वतत्त्वानिष्ठातृत्वनिरतिशयानन्दनादसंवित् - ग

ii) सर्वनिरतिशयानन्तानन्दसंविदनुभवप्रकाशकनादातीतचिच्छक्तिरिति-च

४ निरतिशयानन्तानन्दसंवित् - घ, च ५. प्राचुर्येण च निधनस्तोभ - च

६. हकारप्राचुर्यादरूपनिदानप्राधान्यत्वात् सामवेदात्मकत्वम् - ग

७. निधनप्राधान्याच्च - क

८. i) प्रधानत्वाच्च सामवेदात्मकत्वम् - घ

ii) प्रधानत्वाच्च तस्मादेव सामवेदात्मकत्वम् - च

iii) प्राधान्यत्वात् सामवेदात्मकम् - ग

९. i) ब्राह्मणानामेवावश्यकत्वेनोपासकत्वम् - ग

ii) ब्राह्मणानामावश्यकत्वेन उपासितव्यम् - च

१०. i) आवश्यकत्वेन उपास्यत्वम् - घ ii) आवश्यकत्वेन उपासकत्वम् - ख

११. i) इतरवर्णानामुपास्यम्। अतः चतुर्वर्णानामुपास्यम् अतः - च

ii) इतरवर्णानामुपासकत्वम् - च १२.एतन्मन्त्रानुमतशीलानां - ग, घ, ख

सर्वातिशयाभीष्टपरंपरा: सिध्यन्ति।

इदमेव तत्त्वम् - 'गन्धद्वाराम्' चित्रावसोरावहन्ती त्यादिभि: मन्त्रै: श्रुतय: स्तुवन्ति । अत: [१]चतुर्णां वेदानामपि सारभूतं ब्रह्मक्षत्रियवैश्य शूद्राणामेवो[२]पास्यत्वात् [३]त्रिवेदमयत्वात् 'त्रीणि पदा निहिता गुहासु यस्तद्वेद [४]सविता पिता स तु इति श्रुते: [५]त्रिषु स्थानेषु [६]त्रयाणामपि पदानां क्रमात् वेदक्रमेण मूलहृन्मूर्धकत्वम् ।

[७]वेदानां तत्तत्स्थानेषु बलवत्तयोच्चार्यमाणत्वात् । [८]मावित्यत्र विश्रामयत्वात् उष्णिक्त्वम् । हृल्लेखया विद्यमानत्वात् सान्तत्वम् । अन्त्यखण्डस्य स्वतन्त्रतयोक्तत्वात् अतिच्छन्दस्त्वम् । [९]तत्रैकवर्णम् । **मया सो अन्नमत्ति यो विपश्यति य: प्राणिति य ईं शृणोत्युक्तम् । अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभि: । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।**

(ऋ- सं - मं १० - सू १२५ - मं ४, ५ ,

कृत्स्नस्य मन्त्रस्य पञ्चदशात्मकत्वात् [१०]आपञ्चदशेति [११] काण्डानुक्रमणिकवचनाच्च ।

---

१. चतुर्वर्णानां वेदानामपि - ग २. मेवोपास्यम् त्रिवेद - च

३. त्रिवेदमयत्वात् इति पदं 'घ' मातृकायां नास्ति ।

४. i) सवितु: पितावतु इति - ग, च ii) सवितु: पिता सतू - घ, ख

५. तिसृषु स्थानेषु - च

६. (i) त्रयाणां पदानां - च

(ii) त्रयाणामपि वर्णानां पदानां कम्रात् वेदक्रमेण मूलहृन्मूर्धगत्वम् - घ

७. वेदानां देवानां तत्तत् - च

८. i) मानित्यत्र - ग, ख ii) मालिन्यात्र - घ iii) मालिन्यात्र विद्यमानत्वात् - च

९. अत्रैकवर्णं - च १०. आपञ्चदशादिति - क

११ i) काण्डानुक्रमणी - क ii) काण्डानुक्रमात् तच्च - ग, ख

तच्च गायत्रीमयत्वं स्वतन्त्रतयोपास्यमानमालिनी [1]बीजात्मकमन्त्रस्य बिन्दुनादवर्णद्वयात्मकस्य अत्र विद्यमानत्वात् द्व्यक्षरादेरुष्णिगिति वचनात् उष्णिक्छन्दोमयत्वम् । [2]मनोः खण्डत्रयात्मकत्वात् अनुष्टुप्छन्दोमयत्वम् । तस्य खण्डस्य प्राधान्येन उक्त्वात् तस्य अष्टवर्णात्मकत्वेन अतिच्छन्दोमयत्वम्। तत्रापि द्वितीयमायाबीजराहित्येन [3]सर्ववर्णात्मकमनोः विद्यमानत्वात् जगतीछन्दोमयत्वम् । [4]पञ्चदशवर्णात्मकशक्ति[5]बीजस्य विद्यमानत्वात् पङ्क्तिच्छन्दोमयत्वम् । [6]महामायाव्यतिरेकेण चतुर्वर्णात्मकत्वात् बृहतीछन्दोमयत्वम् । एवं सर्वच्छन्दोमयीयं विद्या मन्त्रब्राह्मणोपनिषद्रूपखण्डत्रयात्मिका ।

[7]एतां विद्यामेव [8]उत्तरनारायणानुवाकः सकलप्रपञ्चसारात्मक [9]ब्रह्मतेजोऽभिवृद्धिमयत्वेन अभिष्टौति ।

[10]सर्वकलासमष्ट्यात्मकत्वेन चेयमेव विद्या सर्ववेदेषु

---

१. बीजात्मक मातृकात्मकमन्त्रस्य - च

२. मनोः खण्डत्रयात्मकत्वात् इत्यारभ्यबृहती छन्दोमयत्वम् इत्यन्तो भागः 'च' मातृकायामस्ति । अन्यत्र मातृकासु एवंरूपो नास्ति ।

३. i) नादवर्णात्मकमनोविद्यमानत्वात् - क
ii) नवावर्णात्मकमनोविद्यमानत्वात् - ग
iii) सदावर्णात्मकमनोविद्यमानत्वात् - च

४. पञ्चवर्णात्मक - घ

५. बीजस्याविद्यामानत्वात् - ग, ख

६. महारूपाव्यतिरेके चतुर्वर्णात्मकत्वात् - ग, ख

७. एकां विद्यामेव - ख

८. i) उत्तरनारायणानुवाचिकसकल - ग ii) उत्तरनारायणानुवाकसकल - घ
iii) उत्तरनारायणानुवाकः प्रपञ्च - घ

९. ब्रह्मतेजोमयत्वेन - च

१०. i) सर्वकलासृष्ट्यात्मकत्वेन चेयं विद्या- च ii) सर्वकालसमष्ट्यात्मकत्वेन -ग, ख

[1]सर्वचैतन्यात्मकत्वेन गूढतयोच्यते । अत एव शैववैष्णवगाणापत्य [2]सौरकापालिकमन्त्रेष्वपि संयोज्योपास्यते ।

अत एव सकलपुरुषार्थावाप्तिपूर्वकात्मज्ञानप्रकाशत्वेन जीवब्रह्म समरसीभावलक्षणमोक्षसाधनी ।

हयग्रीवाल्लब्ध्वा सकलमिदमाद्यं मनुवरं
कृता टीका तस्य [3]प्रथितमतिनागस्त्यमुनिना ।
[4]कलातत्त्वोद्भासिन्यपरिमितभाग्योदयकरी
त्रयीसारादुद्धृत्य च सदुपकाराय सुधियाम् ॥

इति श्रीमत्परम[5]शिवपरब्रह्मरूपिणागस्त्य[6]मुनिना विरचिता [7]श्रुतिसारसमुद्धृता श्रीपञ्चदशाक्षरी श्रीविद्यामनुटीका समाप्ता।

[8]यस्य नो पश्चिमं जन्म यदि वा शङ्करस्स्वयम् ।
तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी ॥

ओं तत्सत्

तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

ओम् शान्तिः शान्तिः शान्तिः

श्रीविद्याभाष्यं सम्पूर्णम्

---

१. सर्वात्मकचैतन्यात्मकत्वेन - क
२. सौरमन्त्रेष्वपि - क
३. प्रथितमहिमाचागस्त्यमुनिना - च
४. कलातत्रोद्भासि - घ, च, ख
५. शिवरूपिणा - क
६. महर्षिणा विरचिता - च
७. श्रुतिसारसमुद्धृतश्रीविद्याटीका समाप्ता - क च
८. यस्य नो इत्यतः ओं तत्सत् संपूर्णम् इति भागः केवलं 'घ' मातृकायामस्ति । अन्यासु नास्ति । 'क' मातृकायां श्रीविद्यामनुटीकासमाप्ता इत्यनन्तरं श्री ओम् इत्यस्ति। 'ख' मातृकायां श्री हयग्रीवाय नमः इत्यस्ति ।

ಶ್ರೀವಿದ್ಯಾಮಂತ್ರಭಾಷ್ಯ

(ಶ್ರೀಅಗಸ್ತ್ಯಮುನಿವಿರಚಿತ)

ಶ್ರೀ ಗುರವೇ ನಮಃ

(ಮೂಲಭಾಗ)

ಜ್ಞಾನಾನಂದಮಯಂ ದೇವಂ ನಿರ್ಮಲಸ್ಫಟಿಕಾಕೃತಿಮ್।
ಆಧಾರಂ ಸರ್ವವಿದ್ಯಾನಾಂ ಹಯಗ್ರೀವಮುಪಾಸ್ಮಹೇ॥
ಗುರವೇ ಸರ್ವಲೋಕಾನಾಂ ಭಿಷಜೇ ಭವರೋಗಿಣಾಮ್।
ನಿಧಯೇ ಸರ್ವವಿದ್ಯಾನಾಂ ದಕ್ಷಿಣಾಮೂರ್ತಯೇ ನಮಃ॥
ವಾಗಿಶಾದ್ಯಾಸ್ಸುಮನಸಃ ಸರ್ವಾರ್ಥಾನಾಮುಪಕ್ರಮೇ।
ಯಂ ನತ್ವಾ ಕೃತಕೃತ್ಯಾಸ್ಸ್ಯುಃ ತಂ ನಮಾಮಿ ಗಜಾನನಮ್॥
ದ್ವೈತಾದ್ವೈತಮಹಾಮೋಹವಿಘ್ನ ಸಂತಾನಮರ್ದಿನೀಮ್।
ಗಣನಾಥಮಯೀಂ ವಂದೇ ಪ್ರತಿಭಾಪರಮೇಶ್ವರೀಮ್॥

ಹರಿಃ ಓಮ್

ತಚ್ಛಂಯೋರಾವೃಣೀಮಹೇ ಗಾತುಂ ಯಜ್ಞಾಯ ಗಾತುಂ ಯಜ್ಞಪತಯೇ! ದೈವೀ ಸ್ವಸ್ತಿರಸ್ತು ನಃ ಸ್ವಸ್ತಿರ್ಮಾನುಷೇಭ್ಯಃ! ಊರ್ಧ್ವಂ ಜಿಗಾತು ಭೇಷಜಂ ಶಂ ನೋ ಅಸ್ತು ದ್ವಿಪದೇ ಶಂ ಚತುಷ್ಪದೇ।

ಓಂ ಶಾಂತಿಃ ಶಾಂತಿಃ ಶಾಂತಿಃ

ಹರಿಃ ಓಮ್

ಇಹ ಖಲು ಭಗವಾನ್ ಸಕಲವಿದ್ಯಾನಿಧಿಃ ಬಹುವಿಧಶಾಖಾಮಯ ಋಗ್ಯಜುಸ್ಸಾಮಮೂರ್ತಿಃ ಅಪರಿಚ್ಛಿನ್ನಚಿಚ್ಛಕ್ತಿಸಮಾವೇಶತರಂಗಿತಹೃದಯಃ ಶ್ರೀಹಯಗ್ರೀವರೂಪೀ ಶ್ರೀಮಹಾವಿಷ್ಣುಃ ಸರ್ವಜ್ಞಾನತಪೋನಿಧಯೇ ಪರಸಚ್ಚಿದಾನಂದಘನಚಿಚ್ಛಕ್ತಿಸ್ವರೂಪಂ ಪೃಷ್ಟವತೇ ಅಗಸ್ತ್ಯಾಯ ಮಹಾಮುನಯೇ ಅನೇಕವಿಧಾನಾಮ್ ಋಗ್ಯಜುಸ್ಸಾಮಶಾಖಾನಾಮ್ ಅನೇಕವಿಧಾಸು ಉಪನಿಷತ್ಸು ತತ್ರ ತತ್ರ ವಿದ್ಯಮಾನರಹಸ್ಯಾರ್ಥಾವಬೋಧಸ್ಯ ದುರವಗಾಹತ್ವಾತ್ ತದರ್ಥಾವಬೋಧೇನೈವ ಪರತತ್ತ್ವಸ್ಯ ಪ್ರಕಾಶ್ಯಮಾನತ್ವಾತ್ ತತ್ರ ತತ್ರ ಮಂತ್ರೇಷು ಏಕೈಕಸ್ಮಿನ್ ಏಕೈಕಸ್ಯೈವ ಪುರುಷಾರ್ಥಸ್ಯ ವಿದ್ಯಮಾನತ್ವಾತ್

ಆಗಮಾನಾಮಪ್ಯನೇಕವಿಧತ್ವೇನ ಚರ್ಯಾ – ಕ್ರಿಯಾ – ಜ್ಞಾನ – ಯೋಗಾನಾಮಪಿ ದುರವಗಾಹತ್ವಾತ್ ತದ್ಜ್ಞಾನೇನೈವ ತತ್ತ್ವಾವಬೋಧಸ್ಯ ಸುಲಭಗಮ್ಯತ್ವಾತ್ ಸಕಲಶ್ರುತಿಸ್ಮೃತಿಪುರಾಣೇತಿಹಾಸಸಾರಭೂತಾಂ ಸಕಲಾಗಮೋಕ್ತಚರ್ಯಾಕ್ರಿಯಾ–ಜ್ಞಾನಯೋಗಸಾರಭೂತಾಂ ಗಂಧದ್ವಾರಾಮ್, ಆವಹಂತೀ, ಚತ್ವಾರಿವಾಕ್, ಚಿತ್ರಾವಸೋ ಇತ್ಯಾದಿಸೂಕ್ತೋಪನಿಷನ್ಮಂತ್ರೈಃ ಯಜುಶ್ಶಾಖಾಭಿರತ್ಯಂತಗೂಢತಯಾ ಪ್ರಬೋಧಿತಾಮ್ ಋಕ್‌ಶಾಖಾಭಿಃ ಅಹಂ ರುದ್ರೇಭಿಃ, ಪವಮಾನ ಶಂ ನ ಇತ್ಯಾದಿಭಿಃ ಸೂಕ್ತಶಸ್ತ್ರಾದಿಭಿಃ ಬಹುವಿಧಸಾಮಭಿಃ ಯಜ್ಞಾಯಜ್ಞೀಯಶ್ರಾಯಂತೀಯ–ಬೃಹದ್ರಥಂತರವಾಚೋವ್ರತ ದೇವವ್ರತಪುರುಷವ್ರತಜ್ಯೇಷ್ಠಸಾಮಾದಿಭಿಃ ಸ್ತೋಭನಿಧನಾದಿಭಿಃ ವಿಶೇಷೇಣ ಅತ್ಯಂತರಹಸ್ಯತಯಾ ಪ್ರಕಾಶ್ಯಮಾನಾಂ ಚ ಸಕಲವೇದಸಾಧಾರಣೀಂ ಸಕಲವೇದ ಮಂತ್ರಬ್ರಾಹ್ಮಣೋಪನಿಷತ್‌ಸಾರಭೂತಾಂ ಸಚ್ಚಿದಾನಂದಪರಬ್ರಹ್ಮಪ್ರಕಾಶಸಾಕ್ಷಾತ್ಕಾರಿಣೀಂ ಬ್ರಹ್ಮಶ್ರೀವಿದ್ಯಾಂ ಪಂಚದಶಸು ವರ್ಣೇಷ್ವಪಿ ಪ್ರತಿವರ್ಣಂ • ತತ್ತದ್ರಹಸ್ಯಾರ್ಥಪ್ರಕಾಶಿನೀಂ ಸಕಲಪುರುಷಾರ್ಥಸಾಧನತ್ವೇನಾಭಿಮತಾಂ ಸಕಲಪುರುಷಾರ್ಥಪ್ರತ್ಯಕ್ಷ ಪ್ರಕಾಶಿನೀಂ ಶ್ರೀವಿದ್ಯಾಮುಪದಿಶತಿ–

ಕ ಏ ಇತಿ– ಕನ– ದೀಪ್ತೌ ಇತ್ಯಸ್ಮಾತ್ ಕನ್ಯಂತೇ ಪ್ರಕಾಶ್ಯಂತೇ ಅನೇನ ಶಬ್ದಾರ್ಥಜಾಲಾನಿ ಇತಿ ಕನತೀತಿ ವಾ ಕ। ಕನತೇಃ ''ಉಣಾದಯೋ ಬಹುಲಮ್'' ಇತಿ ಬಹುಲಗ್ರಹಣಾತ್ ಡಃ। ಸ್ವರಾದಿತ್ವಾತ್ ಅವ್ಯಯಮ್। ಆರ್ಷತ್ವಾತ್ ಪ್ರಗೃಹ್ಯತ್ವೇನ ಪ್ರಕೃತಿಭಾವಃ।

ಏ– ಇಕ್–ಸ್ಮರಣೇ ಇತ್ಯಸ್ಮಾದ್ಧಾತೋಃ, ಇಙ್–ಅಧ್ಯಯನೇ ಇತ್ಯಸ್ಮಾದ್ವಾ ಔಣಾದಿಕೋ ವಿಚ್–ಪ್ರತ್ಯಯಃ। ''ಸಾರ್ವಧಾತುಕಾರ್ಧಧಾತುಕಯೋಃ'' ಇತಿ ಗುಣಃ। ಚಕಾರಸ್ಯ 'ಹಲಂತ್ಯಮ್' ಇತಿ ಇತ್ಸಂಜ್ಞಾಯಾಂ 'ತಸ್ಯ ಲೋಪಃ' ಇತಿ ಲೋಪಃ। ಇಕಾರ ಉಚ್ಚಾರಣಾರ್ಥಃ। ವೇರಪೃಕ್ತಸ್ಯ ಇತಿ ವಲೋಪಃ। ನಿಪಾತಏಕಾಜನಾಙ್ ಇತಿ ಪ್ರಗೃಹ್ಯತ್ವೇನ ಪ್ರಕೃತಿಭಾವಃ।

ಈಯಂತೇ–ಸ್ಮರ್ಯಂತೇ ಅಧೀಯತೇ ವಾ ಸರ್ವವೇದಶಾಸ್ತ್ರಾದಿಕಲಾ ಅನೇನೇತಿ ಏ। ಕಚತತ್ ಪುನಃ ಪುನಃ ಪ್ರಕಾಶಮಾನಬುದ್ಧಿರಿತ್ಯರ್ಥಃ। ಈಯತೇ ವ್ಯಾಪ್ಯತೇ ಇತಿ ಈ। ಈ ವ್ಯಾಪ್ತೌ ಇತ್ಯಸ್ಮಾತ್ ಕ್ವಿಪಿ ನಿಪಾತತ್ವಾತ್ ಪ್ರಕೃತಿಭಾವಃ। ಪುನಃ ಪುನಃ ಪ್ರಕಾಶಮಾನಬುದ್ಧಿವ್ಯಾಪಿನೀಲಹರೀ ಇತಿ ಯಾವತ್। ಲಹರೀ ಇತ್ಯತ್ರ ಪರೋಕ್ಷತಯಾ ಲಹ್ರೀ ಇತ್ಯುಕ್ತಮ್। ಪರೋಕ್ಷಪ್ರಿಯಾ ಇವ ಹಿ ದೇವಾಃ ಇತಿ ಶ್ರುತೇಃ। ಕ ಏ ಈ ಲಹ್ರ್ಯಾಂ ತದ್ಯುಕ್ತಾ ವಾಗ್ಭವಾ ಪರಾನಪೇಕ್ಷಂ ಯಥಾ ತಥಾ ಸ್ವಯಮೇವ ಅವಬೋಧಿನೀ ಇತ್ಯರ್ಥಃ।

ಕ ಏ ಈ ಲ ಹ್ರೀ ಮ್

ಅನೇನ ಧರ್ಮಾಖ್ಯಪುರುಷಾರ್ಥಸಾಧನಬ್ರಹ್ಮವರ್ಚಸಸಮೃದ್ಧಿನಿರ್ಮಿತಿರುಕ್ತಾ। ತಸ್ಮಾದೇವ ವಾಗ್ಭವಮುಚ್ಯತೇ। ವಾಗ್ಜಾಲಪ್ರವೃತ್ತಿನಿಮಿತ್ತತ್ವಾತ್। ಅನೇನ ಬ್ರಾಹ್ಮಣೈಃ ಉಪಾಸ್ಯಮಾನಗಾಯತ್ರೀಮಂತ್ರಸಾರ ಉಕ್ತಃ।

ಇಷ್ಟದೇವತಾಪ್ರಶಂಸನಾತ್ಮಕತ್ವೇನ ವಾಗ್ಜಾಲಪ್ರವೃತ್ತತ್ವಾತ್ ಋಗ್ವೇದಾತ್ಮಕತ್ವಮ್। ಹನ್ಯಂತೇ ಅನೇನ ಐಹಿಕಾಮುಷ್ಮಿಕತಾಪತ್ರಯಾಣಿ ಇತಿ ಹ। ಹನ- ಹಿಂಸಾಗತ್ಯೋರಿತ್ಯಸ್ಮಾತ್ ಕ್ವಿಪ್। ಅಂತಲೋಪಃ ಔಣಾದಿಕಃ। ಅನೇನ ಶತ್ರುರೋಗಾದ್ಯೈಹಿಕಪಂಚಬಾಧಾನಿವೃತ್ತಿಃ। ದುಷ್ಕೃತಜನ್ಯಾಮುಷ್ಮಿಕ ಬಾಧಾನಿವೃತ್ತಿಶ್ಚೋಕ್ತಾ।

ಸೀಯಂತೇ ಉಪಭುಜ್ಯಂತೇ ಅನೇನ ಸರ್ವಧನಕನಕವಸ್ತುವಾಹನ-ಭೂಮ್ಯಾದಿಸಂಪತ್ಪ್ರಚಯಾ ಇತಿ ಸ। ಸ-ಪ್ರತ್ಯವಸಾನಾರ್ಥತ್ವಾತ್ ಸನೋತೇರ್ವಾ ಸ್ಯತೇಃ ವಾ ಚ್ವಿಪ್ರತ್ಯಯೇ ಕೃತೇ ಬಾಹುಲ್ಯೇನ ಲುಪ್ತಾಂತ್ಯವರ್ಣತ್ವೇನ ಗೃಹೀತಃ। ಅನೇನ ಸಕಲರಾಜಪರಿಚ್ಛದಮುಕ್ತಮ್। ಕಾಮ್ಯಂತೇ ಅನೇನ ಸ್ರಕ್‌ಚಂದನವನಿತಾದಿಮದನವಿಷಯಭೋಗಾ ಇತಿ ಕ। ಕಮು-ಕಾಂತೌ ಇತ್ಯಸ್ಮಾತ್ ಪೂರ್ವವತ್ ಪ್ರಕ್ರಿಯಾ। ಅನೇನ ಸಕಲೈಹಿಕಾಮುಷ್ಮಿಕವಿಷಯಭೋಗಃ ಉಕ್ತಃ।

ಹಚ ಸಚ ಕಚ ಹಸಕಾಃ। ಹೀಯತೇ ಪ್ರಾಪ್ಯತೇ ಇತಿ ಹ। ಓಹಾಙ್-ಗತೌ ಇತ್ಯಸ್ಮಾದ್ಧಾತೋಃ ಆತೋನುಪಸರ್ಗೇ ಕಃ। ಹಸಕಾನಾಂ ಹಃ ಹಸಕಹ। ಉಪದ್ರವನಿವೃತ್ಯರ್ಥಸಂಚಯಕಾಮಭೋಗಾವಾಪ್ತಿರಿತಿ ಯಾವತ್। ತಸ್ಯಾಃ ಲಹ್ರೀ ಆಧಿಕ್ಯಮ್।

ಈಶ್ಯತೇ-ಪ್ರಕಾಶ್ಯತೇ ಅನೇನ ದಿಗಂತೇಷು ಕೀರ್ತಿಜಾಲಮ್ ಇತಿ ಈ। ಈಶ-ಐಶ್ವರ್ಯೇ ಇತ್ಯಸ್ಮಾತ್ ಕ್ವಿಪ್। ಬಾಹುಲಕಾತ್ ಅಂತ್ಯಲೋಪಃ।

· ಹಸಕಹಲಹ್ರೀಶ್ಚ ಈಶ್ಚ ಅನಯೋಸ್ಸವರ್ಣದೀರ್ಘಃ।
ಹಸಕಹಲಹ್ರಿಯಃ। ತಾಸಾಂ ನಿರ್ಮಾಣಂ ಹಸಕಲಹ್ರೀಮ್।

ಅನೇನ ಅರ್ಥಕಾಮಪುರುಷಾರ್ಥದ್ವಯನಿರ್ಮಿತಿರುಕ್ತಾ। ತಸ್ಮಾದೇವ ಕಾಮರಾಜತ್ವಮ್।

ಅನೇನ ಕ್ಷತ್ರಿಯವರ್ಣೋಪಾಸ್ಯಮಾನತ್ರಿಷ್ಟುಪ್‌ಛಂದಃಸಾರತ್ವಮ್ ಉಕ್ತಮ್। ಸ್ವಕೀಯಾಭೀಷ್ಟಸಾಧನಕರ್ಮಜಾತವಿಧಾಯಕತ್ವಾತ್। ಯಜುರ್ವೇದಸ್ಯ ಅರ್ಥಕಾಮಯೋಃ ಕ್ರಿಯಾಸಾಧ್ಯತ್ವಾತ್ ಯಜುರ್ವೇದಾತ್ಮಕಮ್।

ಸಕಲಾಭಿಃ ಕಲಾಭಿರವಯವೈಃ ಶಿವಾದಿತತ್ತ್ವೈರ್ವಾ ಸಹಿತಾ ಸಕಲಾ।
ಕಲಾಭಿಃ– ಚತುಃಷಷ್ಟಿಭಿಃ ವಿದ್ಯಾಭಿರ್ವಾ ಸಹಿತಾ ಸಕಲಾ।

.ಹೃಞ್– ಹರಣ ಇತ್ಯಸ್ಮಾದ್ಧಾತೋಃ ಹರತಿ ಸರ್ವಂ ಜಗತ್ ಅಂತ್ಯಕಾಲ ಇತಿ ವ್ಯುತ್ಪತ್ತ್ಯಾ 'ಅತ ಇಞ್ ಇತಿ ಇನಿ ಪ್ರತ್ಯಯಃ।

ಬಾಹುಲ್ಯಾತ್ ಗುಣಾಭಾವೇನ ಯಣಾದೇಶಃ।

ಹ್ರೀ ಸಂಹೃತಿಶಕ್ತಿಃ

ಇಂದ್ಯತೇ– ಪ್ರಕಾಶ್ಯತೇ ಸರ್ವಂ ಜಗದನೇನ ಇತಿ ಈ –ಸೃಷ್ಟಿಶಕ್ತಿಃ।

ಇದಿ– ಪರಮೈಶ್ವರ್ಯೇ ಇತ್ಯಸ್ಮಾತ್ ಕ್ವಿಪ್। ವ್ಯಂಜನಲೋಪಶ್ಚ। ಸರ್ವೇಷಾಂ ನಿಯಂತೃತ್ವೇ ವರ್ತತ ಇತಿ ಸ್ಥಿತಿಶಕ್ತಿಃ।

ಹ್ರೀಚ ಈಚ ಇಚ ಸರೂಪತ್ವಾದೇಕಶೇಷಃ ಹ್ರೀ–ಸಂಹೃತಿಸೃಷ್ಟಿಸ್ಥಿತಿಶಕ್ತಿಃ

ಅಥವಾ ವಿಹರತಿ ಸಕಲಪ್ರಪಂಚರೂಪಿಣೇತಿ ಹ್ರಿಃ।

ವಿಹರಣಾರ್ಥಾದ್ಧರತೇಃ ಇಚ್ ಪ್ರತ್ಯಯಃ । ಹರಿರೂಪೇಣ ಇಂದತಿ ಪರಮನಿಯಂತೃತ್ವೇನ ವರ್ತತೇ ಇತಿ ಹ್ರೀ। ಅಥವಾ ಹೃ ಇತಿ ಕ್ವಿಬಂತಃ। ಲುಪ್ತ– ಕಕಾರಃ ಶಬ್ದಃ ಪ್ರಪಂಚಸಂಹೃತಿವಾಚಕಃ । ಈ ಪ್ರಕಾಶಕ ಇತ್ಯಾತ್ಮೈಕ್ಯಗಮನವಮ್ । ಸವರ್ಣದೀರ್ಘಯಣಾದೇಶಶ್ಚ।

ಸಕಲಪ್ರಪಂಚದೇಹೇಂದ್ರಿಯಾದಿಕಮೂರೀಕೃತ್ಯ ಅನಿರ್ವಚನೀಯ–ಪ್ರಕಾಶರೂಪಾತ್ಮೈಕ್ಯಗಮಕವಮ್ ಇತ್ಯರ್ಥಃ।

ಅಥವಾ ಹೃತ್ಪುಂಡರೀಕಮಧ್ಯೇ ಸುಷಿರಾಂತರದಹರಾಕಾಶೇ ವರ್ತಮಾನಮಹಾಕಾಶಾಂತರ್ಗತಾತಿಸೂಕ್ಷ್ಮಾತಿಪ್ರಕಾಶಾತ್ಮಸ್ಥಾನಗತದೀಪಶಿಖಾ ।

ಶ್ರುತಿಃ –

'ತಸ್ಯಾಂತೇ ಸುಷಿರಗ್ಂ ಸೂಕ್ಷ್ಮಮ್, ಇತ್ಯುಪಕ್ರಮ್ಯ 'ತಸ್ಯಾಃ ಶಿಖಾಯಾಃ ಮಧ್ಯೇ ಪರಮಾತ್ಮಾ ವ್ಯವಸ್ಥಿತಃ' ಇತಿ ನಾರಾಯಣೋಪನಿಷದುಕ್ತಪ್ರಕಾರೇತ್ಯರ್ಥಃ। ಸಕಲಾ ಚ ಸಾ ಹ್ರೀಶ್ಚ ಸಕಲಹ್ರೀಃ।

ಇಷು – ಇಚ್ಛಾಯಾಮ್ ಇತ್ಯಸ್ಮಾದ್ಧಾತೋಃ ಇಷ್ಯತೇ ಅತ್ಯಂತಾಭೀಷ್ಟದತ್ವೇನ ಸರ್ವೈಃ ಈಶವಿಷ್ಣ್ವಾದಿಸ್ತಂಬಪರ್ಯಂತೈಃ ಚೇತನವರ್ಗೈಃ ಕಾಂಕ್ಷ್ಯತ ಇತಿ ಹ್ರೀ । ಇಷ್ವಸಿಭ್ಯಾಂ ಕ್ವಿಪ್ । ವ್ಯಂಜನಲೋಪಶ್ಚ ।

ನಿರತಿಶಯಾನಂತಸತ್ತ್ಯಾನಂದನೈರಂತರ್ಯಮ್ ।

ಈಂ ಪಾಹಿ ಮೇ ಮತೋಹವಾ ಪಾದೇಷೂತ್ತರೇಷ್ವಿತಿ ಶ್ರುತೇಃ।

ತಸ್ಯಾಃ ಪ್ರಮಿತಿಃ ಮಾ। ಲುಪ್ತಾಕಾರೋ ಮಕಾರೋ ಗೃಹ್ಯತೇ। ಮಿಮೀತೇ ವಾ ಮಿನೋತೇರ್ಹವಾ ಇದಂ ಸರ್ವಮಪೀತಿ ಚ । ಉಭಯತ್ರ ಶ್ರುತಿಃ । ಮ್ ಇತಿ ನಾದಾನುಕರಣಶಬ್ದಃ। ಅವ್ಯಯಮ್। ಪ್ರಮಿತಿರ್ನಾಮ ಯಥಾರ್ಥಾನುಭವಃ।

ಅನೇನ ಪರಬ್ರಹ್ಮಣಃ ಚಿಚ್ಛಕ್ತಿರುಚ್ಯತೇ । ನಾದಸ್ಯ ಶುದ್ಧಚೈತನ್ಯಸ್ಯ ಸ್ಥೂಲರೂಪತ್ವಾತ್ । ಶುದ್ಧಚೈತನ್ಯಾತ್ಮಕಚಿಚ್ಛಕ್ತಿಸ್ತು ಉನ್ಮನೀನಾದಾದಿಭ್ಯೋಽಪ್ಯತೀತತ್ವಾತ್ ಅವಾಙ್ಮಾನಸಗೋಚರಾ।

ಮಿನೋತೀತಿ ಹಿ ನಾದಸ್ಸರ್ವಮಾತ್ಮನಿ ತಾದಾತ್ಮ್ಯೇನ ನಿರತಿಶಯ ಸತ್ಯಾನಂತಾನಂದಾನುಭವಪ್ರಕಾಶಕನಾದಾತ್ಮಕಚಿಚ್ಛಕ್ತಿರಿತ್ಯರ್ಥಃ । ತತ್ರ ಖಲು ಸರ್ವೇ ಪ್ರಪಂಚಾ ಮೀಯಂತೇ ಸೃಜ್ಯಂತೇ ಚ।

ಏತಚ್ಚತುರ್ಥಖಂಡಃ

ಸಕಲಹ್ರೀಂ ರೂಪಂ ಈಂ ಚ ಸಕಲಹ್ರೀಮ್ ಅಥವಾ ಹ್ರೀಂ ಚ ತತ್ ಈಂ ಚ ಹ್ರೀಮ್ । ಸಕಲಂ ಚ ತತ್ಹ್ರೀಂ ಚ ಸಕಲಹ್ರೀಮ್ । ಸಕಲಹೃದಯಾಕಾಶದೀಪಶೀಖಾಂತರ್ಗತಸರ್ವತತ್ತ್ವಾಧಿಷ್ಠಾತೃನಿರತಿಶಯ–ಸತ್ಯಾನಂತಾನಂದಾನುಭವಪ್ರಕಾಶನಾದಾತ್ಮಕಚಿಚ್ಛಕ್ತಿಃ।

ಅನೇನ ಮೋಕ್ಷಸಾಧನನಾದಲಯಯೋಗಾನಂದಾನುಭವ ಉಕ್ತಃ । ಚಿತ್ತವೃತ್ತಿನಿರೋಧಪ್ರಧಾನತ್ವಾತ್ ವೈಶ್ಯಜಾತ್ಯುಪಾಸ್ಯಮಾನಜಗತೀಛಂದಃ ಸಾರಃ ಉಕ್ತಃ।

ಸಾಮವೇದಸ್ಯ ಗಾನಪ್ರಾಧಾನ್ಯೇನ ನಾದವಿಲೀನಚಿತ್ತತ್ವಾದತ್ರ ಚ ನಾದಲಯಯೋಗಸ್ಯ ಉಪವರ್ಣಿತತ್ವಾಚ್ಚ ಸಾಮವೇದಾತ್ಮಕಮ್।

ಅಸ್ಯಮಂತ್ರಸ್ಯ ಏವಮರ್ಥಃ

ಕ ಏ ಈ ಲ ಹ್ರೀಂ ಚ ಹ ಸ ಕ ಹ ಲಹ್ರೀಂ ಚ ಸಮ್ಯಕ್ ಕಲಯತಾಮಿತಿ ಕಏಈಲಹ್ರೀಂ ಸಕಲಂ ಕಏಈಲಹ್ರೀಂ ಹಸಕಹಲಹ್ರೀಂ ಸಕಲಂಚ ತತ್ ಹ್ರೀಂ ಚ ಕಏಈಲಹ್ರೀಂ ಹಸಕಹಲಹ್ರೀಂ ಸಕಲಹ್ರೀಮ್ ಇತ್ಯೇವಮರ್ಥಃ।

ಯಸ್ಯ ನೋ ಪಶ್ಚಿಮಂ ಜನ್ಮ ಯದಿ ವಾ ಶಂಕರಸ್ಸ್ವಯಮ್ ।
ತೇನೈವ ಲಭ್ಯತೇ ವಿದ್ಯಾ ಶ್ರೀಮತ್ಪಂಚದಶಾಕ್ಷರೀ ॥

ಓಂ ತತ್ಸತ್

ತಚ್ಛಂಯೋರಾವೃಣೀಮಹೇ ಗಾತುಂ ಯಜ್ಞಾಯ ಗಾತುಂ ಯಜ್ಞಪತಯೇ ।
ದೈವೀ ಸ್ವಸ್ತಿರಸ್ತು ನಃ ಸ್ವಸ್ತಿರ್ಮಾನುಷೇಭ್ಯಃ ।
ಊರ್ಧ್ವಂ ಜಿಗಾತು ಭೇಷಜಂ ಶಂ ನೋ ಅಸ್ತು ದ್ವಿಪದೇ ಶಂ ಚತುಷ್ಪದೇ''

ಓಂ ಶಾಂತಿಃ ಶಾಂತಿಃ ಶಾಂತಿಃ

ಶ್ರೀವಿದ್ಯಾಮಂತ್ರಭಾಷ್ಯಂ ಸಂಪೂರ್ಣಮ್

ಶ್ರೀ ವಿದ್ಯಾಮಂತ್ರಭಾಷ್ಯ.

(ಅಗಸ್ತ್ಯಮುನಿವಿರಚಿತ).

(ಕನ್ನಡಾನುವಾದ)

ಸಕಲವಿದ್ಯಾನಿಧಿಯಾದ, ಅನೇಕವಿಧಶಾಖೆಗಳಿಂದ ಕೂಡಿರುವ ಋಗ್ಯಜುಸ್ಸಾಮವೇದಗಳ ಸ್ವರೂಪನಾದ, ಅಪರಿಮಿತವಾದ ಜ್ಞಾನಶಕ್ತಿಯಿಂದ ತುಂಬಿಕೊಂಡಿರುವ ಹೃದಯವುಳ್ಳ ಹಯಗ್ರೀವರೂಪನಾದ ಶ್ರೀಮಹಾವಿಷ್ಣುವನ್ನು ಸರ್ವಜ್ಞಾನತಪೋನಿಧಿಯಾದ, ಅಗಸ್ತ್ಯಮಹರ್ಷಿಯು ಪರಮಶ್ರೇಷ್ಠವಾದ ಸಚ್ಚಿದಾನಂದರೂಪವಾದ ಜ್ಞಾನಸ್ವರೂಪವನ್ನು ತನಗೆ ತಿಳಿಸಬೇಕೆಂದು ಪ್ರಾರ್ಥಿಸುವನು. ವೇದಗಳು ನಾನಾ ಶಾಖೆಗಳಿಂದ ಕೂಡಿವೆ. ಒಂದೊಂದು ವೇದಕ್ಕೂ ಅನೇಕ ಉಪನಿಷತ್ತುಗಳಿವೆ. ಅಲ್ಲೆಲ್ಲಾ ಹೇಳಿರುವ ರಹಸ್ಯಾರ್ಥವನ್ನು ತಿಳಿಯುವುದು ಬಹು ಕಷ್ಟಕರವಾದುದು. ಆದರೆ ಅವುಗಳ ಅರ್ಥಜ್ಞಾನವಾಧಾಗಲೇ ಪರತತ್ತ್ವವನ್ನು ಪ್ರಕಾಶಪಡಿಸಲು ಸಾಧ್ಯ. ಆದರೆ ವೇದಗಳಲ್ಲಿ ಅಪರಿಮಿತವಾದ ಮಂತ್ರರಾಶಿಯೇ ಇದೆ. ಒಂದೊಂದು ಮಂತ್ರದಲ್ಲಿ ಒಂದೊಂದು ಪುರುಷಾರ್ಥವನ್ನು ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ. ವೇದಗಳಂತೆ ಮುಂದೆ ಬಂದ ಆಗಮಗಳೂ ಬಹುವಾಗಿವೆ. ಅವುಗಳು ಚರ್ಯಾ-ಕ್ರಿಯಾ-ಜ್ಞಾನ-ಯೋಗಗಳೆಂಬ ನಾಲ್ಕು ಪಾದಗಳಿಂದ ಕೂಡಿವೆ. ಇಲ್ಲೆಲ್ಲಾ ಪ್ರತಿಪಾದಿಸಿರುವ ವಿಷಯಗಳು ದುರೂಹವಾಗಿವೆ. ಇವುಗಳನ್ನು ಕಷ್ಟಪಟ್ಟು ಅಭ್ಯಸಿಸಿದಾಗ ತತ್ತ್ವಜ್ಞಾನವನ್ನು ಸುಲಭವಾಗಿ ತಿಳಿದುಕೊಳ್ಳಬಹುದು. ''ಗಂಧದ್ವಾರಾಂ,'' ''ಆವಹಂತೀ,'' ''ಚತ್ವಾರಿವಾಕ್ಪರಿಮಿತಾ'' ''ಚಿತ್ರಾವಸೋ'' ಮೊದಲಾದ ಸೂಕ್ತಗಳಲ್ಲಿ ಉಪನಿಷತ್ತಿನ ಮಂತ್ರಗಳಿಂದ ಯಜುಶ್ಶಾಖೆಗಳು, ''ಅಹಂ ರುದ್ರೇಭಿಃ,'' ''ಪವಮಾನ ಶಂನ'' ಮೊದಲಾದ ಸೂಕ್ತ ಮತ್ತು ಶಸ್ತ್ರಮಂತ್ರಗಳಿಂದ ಋಗ್ವೇದದ ಶಾಖೆಗಳು, ''ಯಜ್ಞಾಯಜ್ಞೀಯ,'' ''ಶ್ರಾಯಂತೀಯ,'' ''ಬೃಹದ್ರಥಂತರ,'' ''ವಾಚೋವ್ರತ,'' ''ದೇವವ್ರತ '' ''ಪುರುಷವ್ರತ ''ಗಳೆಂಬ ಉತ್ತಮ ಸಾಮಮಂತ್ರಗಳಿಂದ, ಸ್ತೋಭನಿಧನಾದಿಕ್ರಮಗಳಿಂದ ಸಾಮಶಾಖೆಗಳು ಆತ್ಮತತ್ತ್ವವನ್ನು ಪ್ರತಿಪಾದಿಸಿವೆ. ಶ್ರುತಿಗಳಂತೆ ಸ್ಮೃತಿಗಳು, ಪುರಾಣಗಳು, ಇತಿಹಾಸಗಳು, ಸಕಲಆಗಮಗಳು ತಮ್ಮ ನಾಲ್ಕು ಪಾದಗಳ ಮೂಲಕ ಈ ಆತ್ಮವಿದ್ಯೆಯನ್ನು ಮತ್ತಷ್ಟು ಹೇಳಿವೆ. ಎಲ್ಲ ವೇದಗಳ ಬ್ರಾಹ್ಮಣ, ಆರಣ್ಯಕ, ಉಪನಿಷತ್ತುಗಳಲ್ಲೂ ಸರ್ವಸಾಧಾರಣವಾಗಿ, ಶ್ರೀವಿದ್ಯೆಯಸಾರವನ್ನು ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ. ಇವೆಲ್ಲವುಗಳಿಂದಲೂ ಪ್ರತಿಪಾದಿತವಾದ, ಸಾರಭೂತವಾದ ಶ್ರೀವಿದ್ಯೆಯು ಸಚ್ಚಿದಾನಂದಸ್ವರೂಪನಾದ ಪರಬ್ರಹ್ಮನ ಸಾಕ್ಷಾತ್ಕಾರವನ್ನು ಉಂಟು

ಮಾಡುವಂತಹುದು. ಈ ಶ್ರೀವಿದ್ಯೆಯು ಬ್ರಹ್ಮಸ್ವರೂಪವಾಗಿದೆ. ಪಂಚದಶವರ್ಣಗಳ ಮೂಲಕ ಆಯಾಯಾವರ್ಣದ ರಹಸ್ಯಾರ್ಥವನ್ನು ಪ್ರಕಾಶಪಡಿಸುವುದಾಗಿದೆ. ಸಕಲ ಪುರುಷಾರ್ಥಗಳನ್ನು ಸಾಧಿಸಿಕೊಡುವುದರಲ್ಲಿ ಇದು ಸಮರ್ಥವಾಗಿದೆ. ಜೊತೆಗೆ ಎಲ್ಲ ಪುರುಷಾರ್ಥಗಳ ಸ್ವರೂಪವನ್ನು ಪ್ರಕಾಶಪಡಿಸುವಂತಹುದೂ ಆಗಿದೆ. ಅಂತಹ ಶ್ರೀವಿದ್ಯೆಯನ್ನು ಮಹಾವಿಷ್ಣುವು ಹಯಗ್ರೀವರೂಪನಿಂದ ಅಗಸ್ತ್ಯಮಹರ್ಷಿಗೆ ಉಪದೇಶಿಸುವನು–ಕ,ಏ, ಎಂಬುದಾಗಿ.

ಕವರ್ಣದ ಅರ್ಥಃ– ಕನ–ದೀಪ್ತೌ ಎಂಬ ದೀಪ್ತ್ಯರ್ಥಕ ಕನಧಾತುವಿಗೆ 'ಉಣಾದಯೋ ಬಹುಲಮ್' ಎಂದು ಡಪ್ರತ್ಯಯವು ಬಂದು, ಸ್ವರಾದಿಗಣದಲ್ಲಿ ಪಠಿತವಾದ್ದರಿಂದ ಅವ್ಯಯವಾಗುತ್ತದೆ. ಆರ್ಷಶಬ್ದವಾದ್ದರಿಂದ ಪ್ರಗೃಹ್ಯಸಂಜ್ಞೆ ಹಾಗೂ ಪ್ರಕೃತಿಭಾವವನ್ನು ಪಡೆದು 'ಕ' ಎಂದಾಗುತ್ತದೆ.ಶಬ್ದಾರ್ಥಜಾಲಗಳನ್ನು ಇದರಿಂದ ಪ್ರಕಾಶಪಡಿಸುವಕಾರಣ–ಇದು 'ಕ' ಎನಿಸುತ್ತದೆ. ಅಲ್ಲಿಗೆ 'ಕ' ಎಂಬವರ್ಣಕ್ಕೆ ಸಕಲಶಬ್ದಾರ್ಥಪ್ರಕಾಶಕ ಎಂಬ ಅರ್ಥವಾಗುತ್ತದೆ.

'ಏ' ಕಾರದ ಅರ್ಥಃ–ಸ್ಮರಣಾರ್ಥಕ ಇಕ್‌ಧಾತು ಅಥವಾ ಅಧ್ಯಯನಾರ್ಥಕ – ಇಙ್ ಧಾತುವಿಗೆ ಉಣಾದಿ ವಿಚ್‌ಪ್ರತ್ಯಯವನ್ನು ಹೇಳಿ 'ಸಾರ್ವಧಾತುಕಾರ್ಧಧಾತುಕಯೋಃ' ಎಂದು ಇಕಾರಕ್ಕೆ ಏಕಾರವನ್ನು ಹೇಳಬೇಕು. ಚಕಾರಕ್ಕೆ 'ಹಲಂತ್ಯಮ್' ಎಂದು ಇತ್‌ಸಂಜ್ಞೆ ''ತಸ್ಯಲೋಪಃ'' ಎಂದು ಲೋಪ. ಇಕಾರ ಉಚ್ಚಾರಣಾರ್ಥ 'ವೇರಪೃಕ್ತಸ್ಯ' ಎಂದು ವಲೋಪ. 'ಏಪಾತಏಕಾಜನಾಙ್' ಎಂದು ಪ್ರಗೃಹ್ಯಸಂಜ್ಞೆ ಮತ್ತು ಪ್ರಕೃತಿಭಾವ ಬಂದು–'ಏ' ಎಂದಾಗುತ್ತದೆ. 'ಸಕಲವೇದಶಾಸ್ತ್ರಾದಿಕಲೆ'ಯನ್ನು ಇದರಿಂದ ಪುನಸ್ಸಂಧಾನಮಾಡಿ ತಿಳಿದುಕೊಳ್ಳುವುದರಿಂದ–'ಏ' ಎಂದು ಹೇಳಲಾಗಿದೆ.

'ಈ' ಕಾರದ ಅರ್ಥಃ–ಈ ವ್ಯಾಪ್ತೌ ಎಂಬ ಅರ್ಥವನ್ನು ಕೊಡುವ ಈ ಧಾತುವಿಗೆ ಕ್ವಿಪ್ ಪ್ರತ್ಯಯವನ್ನು ಹೇಳಿ ಪ್ರಕೃತಿಭಾವಮಾಡಿದರೆ 'ಈ' ಎಂದೇ ಆಗುತ್ತದೆ. ಮತ್ತೆ ಮತ್ತೆ ವಿಷಯಗಳನ್ನು ಪ್ರಕಾಶಪಡಿಸುವ ಬುದ್ಧಿಯಲಹರೀ ಎನ್ನುವುದು ಈ ಕಾರದ ಅರ್ಥ. ಲಹರೀ ಎನ್ನುವಲ್ಲಿ ಪರೋಕ್ಷವಾಗಿ ಲಹ್ರೀ ಎಂದು ಹೇಳಲಾಗಿದೆ. ದೇವತೆಗಳು ಪರೋಕ್ಷಪ್ರಿಯರು. ಕ, ಏ, ಈ, ಮತ್ತು ಲಹರಿಯಲ್ಲಿ ಇತರರನ್ನು ಅಪೇಕ್ಷಿಸದ ತಾನಾಗಿಯೇ ತಿಳಿದುಕೊಳ್ಳುವ ಬುದ್ಧಿಯಲಹರೀ ಎಂದು ಅರ್ಥವಾಗುತ್ತದೆ. ಇದರಿಂದ ಧರ್ಮವೆಂಬ ಪುರುಷಾರ್ಥವನ್ನು ಸಾಧಿಸಿಕೊಡುವ ಬ್ರಹ್ಮವರ್ಚಸ್ಸಿನ ಸಮೃದ್ಧಿ ಎಂದು ಹೇಳಲ್ಪಡುವುದು. ಅದರಿಂದ ವಾಕ್ಕಿನ ಉತ್ಪತ್ತಿ, ವಾಗ್ಜಾಲಪ್ರವೃತ್ತಿಗೆ ಇದು ಕಾರಣವೂ ಆಗಿದೆ. ಹೀಗೆ ಕ–ಏ–ಈ –ಲಹರೀ ಎಂಬುದರಿಂದ ಬ್ರಾಹ್ಮಣರು ಉಪಾಸನೆ

ಮಾಡುವ ಗಾಯತ್ರೀಮಂತ್ರದ ಸಾರವನ್ನು ಹೇಳಲಾಯಿತು. ಇಷ್ಟದೇವತೆಯನ್ನು ಪ್ರಶಂಸನೆ ಮಾಡಲು ವಾಗ್ಜಾಲವು ಹೊರಟಿದೆಯಾದ್ದರಿಂದ ಋಗ್ವೇದ ಸ್ವರೂಪವು ಆಗುವುದು.

ಹಕಾರದ ಅರ್ಥ:– ಹಿಂಸೆ–ಮತ್ತು ಗತಿ ಎಂಬ ಅರ್ಥವನ್ನು ಕೊಡುವ 'ಹನ್' ಧಾತುವಿನಿಂದ 'ಹ' ಕಾರವಾಗಿದೆ. ಕ್ವಿಪ್ ಪ್ರತ್ಯಯ ಬಂದು ಲೋಪವು ಬಂದು 'ಹ' ಎಂದೇ ಆಗುವುದು. ಶತ್ರು, ರೋಗ ಮೊದಲಾದ ಲೌಕಿಕಬಾಧೆಗಳನ್ನು ನಾಶಮಾಡುವುದು ಹಾಗೂ ದುಷ್ಕೃತ್ಯದಿಂದ ಉಂಟಾದ ಪಾರಲೌಕಿಕಬಾಧೆಯನ್ನು ನಾಶಮಾಡುವುದೇ–'ಹ' ಕಾರ ಎಂದು ಅರ್ಥವಾಗುವುದು.

ಸಕಾರಾರ್ಥ:– ಉಪಭೋಗಿಸಲ್ಪಡುವಿಕೆ–ಎಂಬ ಅರ್ಥ ಕೊಡುವ 'ಸೀ' ಧಾತುವಿನಿಂದ ಅಥವಾ ಉಪಭೋಗಾರ್ಥಕ 'ಸ' ಅಥವಾ 'ಸನ್' 'ಸ್ಯತಿ' ಧಾತುಗಳಿಗೆ ಚ್ವಿ ಪ್ರತ್ಯಯ ಬಂದು ನ, ಈ, ತ್ ಇತ್ಯಾದಿವರ್ಣಗಳಿಗೆ ಲೋಪ ಒಂದು 'ಸ' ಎಂದಾಗುತ್ತದೆ. ಸಕಲಧನ–ಕನಕ–ವಸ್ತು ವಾಹನ–ಭೂಮಿ–ಮೊದಲಾದ ಸಂಪತ್ತುಗಳು ಹಾಗೂ ಅವುಗಳ ಉಪಭೋಗ ಮಾಡುವ ರಾಜಭೋಗಸಿದ್ಧಿಯನ್ನುಂಟುಮಾಡುವುದು 'ಸ'ಕಾರ ಎಂದು ತಿಳಿಯುವುದು.

ಕಕಾರಾರ್ಥ:– 'ಕಾಂತಿ'–ಇಚ್ಛೆ ಎಂಬ ಅರ್ಥಕೊಡುವ 'ಕಮ್' ಧಾತುವಿಗೆ 'ಚ್ವಿ' ಮೊದಲಾದ ಪ್ರತ್ಯಯಾದಿಗಳು ಬಂದು 'ಕ' ಎಂದಾಗುತ್ತದೆ. ಎಲ್ಲ ಬಗೆಯ ಐಹಿಕ–ಆಮುಷ್ಮಿಕ ವಿಷಯ ಭೋಗಗಳೆಂದು 'ಕ' ಕಾರದ ಅರ್ಥ.

ಮತ್ತೆ ಈಕಾರದ ಅರ್ಥ:– ಪ್ರಕಾಶ ಮತ್ತು ಐಶ್ವರ್ಯ ಎಂಬ ಅರ್ಥಗಳನ್ನು ಕೊಡುವ 'ಈಶ' ಧಾತುವಿನಿಂದ ಮುಂದೆ ಕ್ವಿಪ್‌ಪ್ರತ್ಯಯಾದಿಗಳನ್ನು ಮಾಡಿದರೆ–'ಈ' ಎಂದಾಗುತ್ತದೆ. ಇದರೊಡನೆ 'ಲಹ್ರೀ' ಎಂದು ಸೇರಿಸಿದರೆ–'ಹಸಕಲಹ್ರೀ'–ಎಂದಾಗುತ್ತದೆ. 'ಈ' ಕಾರವೂ ಇದರೊಡನೆ ಸೇರಿದೆ. ಇದರಿಂದ ಅರ್ಥ–ಕಾಮಗಳೆಂಬ ಎರಡು ಪುರುಷಾರ್ಥಗಳನ್ನು ಹೇಳಲಾಗಿದೆ. ಇದರಿಂದಲೇ ಕಾಮನೆಯ ಸಿದ್ಧಿಯೂ ಆಗುತ್ತದೆ. ಇದರ ಮೂಲಕ ಕ್ಷತ್ರಿಯವರ್ಣದವರು ಉಪಾಸಿಸುವ ತ್ರಿಷ್ಟುಪ್‌ಛಂದಸ್ಸಾರದೇವತೆಯೂ ಉಕ್ತಳಾಗುವಳು. ಯಜುರ್ವೇದವು ಇಷ್ಟಾರ್ಥದಾಯಕ ಯಜ್ಞಸ್ವರೂಪವಾದ್ದರಿಂದ ಈ ವರ್ಣಗಳ ಅನುಸಂಧಾನದಿಂದ ಕರ್ಮಗಳ ಮೂಲಕ ಇಷ್ಟಾರ್ಥ ಪ್ರಾಪ್ತಿಯಾಗುವುದರಿಂದ–ಯಜುರ್ವೇದ ಸ್ವರೂಪವನ್ನು ತಿಳಿಸಲಾಗಿದೆ. ಶಿವಾದಿಸಕಲಕಲಾತತ್ತ್ವಗಳಿಂದ ಕೂಡಿರುವುದು ಸಕಲಾ. 64 ಕಲೆಗಳಿಂದ ಅಥವಾ ವಿದ್ಯೆಗಳಿಂದ ಕೂಡಿರುವುದು ಸಕಲಾ. ಚೆನ್ನಾಗಿ ನಿರೂಪಿಸುವುದು ಎನ್ನುವುದಕ್ಕೂ

'ಸಕಲಾ' ಎಂದೇ ಅರ್ಥ.

ಹ್ರೀ:– ಹರಣಾರ್ಥಕ ಹೃಞ್ ಧಾತುವಿಗೆ 'ಇನಿ' ಪ್ರತ್ಯಯ ಹೇಳಿ, ಯಣಾದೇಶಾದಿಗಳನ್ನು ಮಾಡಿದರೆ 'ಹ್ರೀ' ಎಂದಾಗುತ್ತದೆ. 'ಜಗತ್ತಿನ ಅಂತ್ಯಕಾಲ' ಎಂದು ಇದರ ಅರ್ಥ. 'ಹ್ರೀ' ಎಂದರೆ ಸಂಹಾರಕಶಕ್ತಿ ಎಂದು ಅರ್ಥ ಸಿದ್ಧಿಸುವುದು.

ಈಕಾರಾರ್ಥಮತ್ತೆ :– ಪರಮೈಶ್ವರ್ಯದಾಯಕ–ಎಂಬ ಅರ್ಥಕೊಡುವ 'ಇದ್'ಧಾತುವಿಗೆ ಕ್ವಿಪಾದಿಪ್ರತ್ಯಯಗಳನ್ನು ಹೇಳಿದಾಗ 'ಈ' ಎಂದಾಗುತ್ತದೆ . ಎಲ್ಲರನ್ನೂ ನಿಯಂತ್ರಿಸಿ ನಿಂತಿರುವ ಸ್ಥಿತಿಶಕ್ತಿ ಎಂದು 'ಈ' ಕಾರಕ್ಕೆ ಅರ್ಥ. 'ಹ್ರೀ–ಈ' ಎರಡೂ ಸೇರಿದರೆ ಹ್ರೀ ಎಂದಾಗುತ್ತದೆ. ಅಥವಾ ವಿಹರಣಾರ್ಥಕ 'ಹರ್' ಧಾತುವಿಗೆ ಇಚ್ ಪ್ರತ್ಯಯ ಮಾಡಿದರೆ 'ಹ್ರೀ' ಎಂದಾಗುತ್ತದೆ. ಸಕಲ ಪ್ರಪಂಚರೂಪಿನಿಂದ ವಿಹರಿಸುವವಳು–'ಹ್ರೀ' ಎಂದು. ಹಾಗೆಯೇ ಸಕಲಜೀವಿಗಳನ್ನು ನಿಯಂತ್ರಿಸಿ ಕಾಪಾಡುತ್ತಿರುವವನು 'ಹರಿ'. ಅವನು ಸ್ಥಿತಿಕಾರಕ ಇದನ್ನು ಹೇಳುವುದು 'ಹ್ರೀ' ಎಂಬ ಶಬ್ದ. ಮತ್ತೊಂದು ರೀತಿಯಲ್ಲಿ ಹೇಳಿದರೆ 'ಹ' ಎನ್ನುವುದು ಕ್ವಿಬಂತಶಬ್ದ, ಇಲ್ಲಿ ಕಕಾರ ಲೋಪವಾಗಿದೆ. ಪ್ರಪಂಚ ಸಂಹಾರಕವೆಂಬ ಅರ್ಥ ಇದಕ್ಕೆ. ಹಾಗೇಯೇ 'ಈ' ಕಾರಕ್ಕೆ ಪ್ರಕಾಶಕ ಎಂದು ಆತ್ಮೈಕ್ಯಗಮನವು ಸಿದ್ಧಿಸುತ್ತದೆ. ಹ್ರ–ಹ–ಈ–ಎಲ್ಲ ಸೇರಿ ಲೋಪಾದಿಗಳು ಬಂದು 'ಈ' ಎಂದೇ ಉಳಿಯುವುದು. ಆಗ ಸಕಲಪ್ರಪಂಚದಲ್ಲಿ ಕಂಗೊಳಿಸುತ್ತಿರುವ ಆತ್ಮಸ್ವರೂಪ ಎಂಬ ಅರ್ಥವು 'ಈ' ಕಾರಕ್ಕೆ ಬರುವುದು. ಈ ಕಾರಕ್ಕೆ–ಹೃದಯ ಕಮಲದ ಮಧ್ಯದಲ್ಲಿರುವ ಗುಹಾಂತರ್ಗತವಾದ ದಹರಾಕಾಶದಲ್ಲಿರುವ–ಮಹಾಕಾಶಾಂತರ್ಗತವಾದ ಅತಿಸೂಕ್ಷ್ಮವಾಗಿರುವ, ಪ್ರಕಾಶರೂಪವಾದ . ಆತ್ಮಸ್ಥಾನಾಂತರ್ಗತವಾದ, ದೀಪಶಿಖೆ ಎಂದು ಅರ್ಥವಾಗುವುದು. ಇದನ್ನು 'ತಸ್ಯಾಃ ಶಿಖಾಯಾ ಮಧ್ಯೇ ಪರಮಾತ್ಮಾ ವ್ಯವಸ್ಥಿತ:' ಇತ್ಯಾದಿಮಂತ್ರಗಳಿಂದ ಮಹಾನಾರಾಯಣೋಪನಿಷತ್ತು ತಿಳಿಸಿದೆ. ಸ–ಕ–ಲ–ಹ್ರೀ–ಗಳು ಸೇರಿ–'ಸಕಲಹ್ರೀ' ಎಂದಾಗುವುದು. ಇಚ್ಛಾರ್ಥಕವಾದ ಇಷ್–ಧಾತುವಿನಿಂದ ಈ ಎಂದಾಗುವುದು. ಹ್ರೀ ಗೆ ಈ ಸೇರಿ ಹ್ರೀ ಎಂದಾಗುತ್ತದೆ. ''ಇಷ್ಯಸಿಭ್ಯಾಂ ಕ್ವಿಪ್'' ಎಂಬುದರಿಂದ ಕ್ವಿಪ್ ಪ್ರತ್ಯಯವು ಬರುತ್ತದೆ. ನಂತರ ಎಲ್ಲ ವ್ಯಂಜನಗಳೂ ಲೋಪವಾಗುತ್ತವೆ. ಈಕಾರಕ್ಕೆ ಮಕಾರವು ಸೇರಿ ಈಮ್ ಎಂದಾಗುತ್ತದೆ. ನಿರತಿಶಯವಾದ ಅನಂತವಾದ ಸತ್ಯಾನಂದವು ನಿರಂತರವಾಗಿ ತೋರುವುದೆಂದು 'ಈಮ್' ಶಬ್ದಕ್ಕೆ ಅರ್ಥ. 'ಈಂ ಪಾಹಿ ಮೇ––' ಮೊದಲಾದ ಶ್ರುತಿಗಳು ಈ ಅರ್ಥವನ್ನು ಪುಷ್ಟಿಗೊಳಿಸುತ್ತವೆ. ಇಲ್ಲಿ ಮಕಾರವು ನಾದಾನುಕರಣ ಶಬ್ದ, ಹೀಗಾಗಿ ಈಮ್ ಎನ್ನುವುದು ಅವ್ಯಯವಾಗುತ್ತದೆ. ಪ್ರಮಿತಿ ಶಬ್ದಕ್ಕೆ–ಯಥಾರ್ಥಾನುಭವವೆಂದು ಹೆಸರು. ಇದರಿಂದ ಪರಬ್ರಹ್ಮನ

ಜ್ಞಾನರೂಪಶಕ್ತಿಯನ್ನು ಹೇಳಲಾಗಿದೆ.ನಾದವು ಶುದ್ಧಚೈತನ್ಯದಿಂದ ಕೂಡಿದ ಜ್ಞಾನಶಕ್ತಿಯಾದರೂ ಮನಸ್ಸಿನಲ್ಲಿ ಉಂಟಾಗುವ ಉನ್ಮನೀನಾದ ಮೊದಲಾದುವುಗಳನ್ನು ಮೀರಿ ನಿಂತಿದ್ದು . ಇದು ವಾಕ್ಕು ಮತ್ತು ಮನಸ್ಸುಗಳಿಗೆ ಅಗೋಚರವಾಗಿದೆ. ಸಕಲನಾದಸ್ವರೂಪವೂ ಮಾನಕ್ಕೆ ದೊರಕುವಂತಹುದು. ಇದು ಶುದ್ಧಚೈತನ್ಯದೊಡನೆ ಸೇರಿ ತಾದಾತ್ಮ್ಯವನ್ನು ಹೊಂದಿದಾಗ ನಿರತಿಶಯವಾದ ಸತ್ಯಾನಂದಾನುಭವಪ್ರಕಾಶನರೂಪವಾದ ನಾದರೂಪಜ್ಞಾನ ಶಕ್ತಿಯಾಗುವುದು. ಈ ಜ್ಞಾನಶಕ್ತಿಯಲ್ಲೇ ತಾನೇ ಸಕಲಪ್ರಪಂಚವೂ ಮುಳುಗುವುದು ಹಾಗೂ ಸೃಷ್ಟವಾಗುವುದು. ಇದು ನಾಲ್ಕನೆಯ ಖಂಡವು. ಸಕಲ ಶಬ್ದದೊಡನೆ ಹ್ರೀಂ ಮತ್ತು ಈಂ ಶಬ್ದಗಳನ್ನು ಸೇರಿಸಿ ದ್ವಂದ್ವ ಮಾಡಿದರೆ ಸಕಲ ಹ್ರೀಂ ಎಂದಾಗುತ್ತದೆ. ಅಥವಾ ಸಕಲ ಮತ್ತು ಹ್ರೀ ಶಬ್ದಗಳನ್ನು ಸೇರಿಸಿ ದ್ವಂದ್ವ ಮಾಡಿದರೂ ಸಕಲಹ್ರೀಂ ಎಂದಾಗುತ್ತದೆ. ಎಲ್ಲರ ಹೃದಯಾಕಾಶದಲ್ಲೂ ದೀಪ ಶಿಖೆಯಂತೆ ಬೆಳಗುತ್ತಿದ್ದು ಅದರಲ್ಲಿ ಸಕಲತತ್ತ್ವಗಳನ್ನು ಅಡಗಿಸಿಕೊಂಡು, ನಿರತಿಶಯವಾದ ಸತ್ಯ–ಅನಂತ–ಆನಂದ–ಅನುಭವ' ಪ್ರಕಾಶನರೂಪವಾದ ನಾದರೂಪವಾದ ಜ್ಞಾನಶಕ್ತಿಯೆಂದು ಇದಕ್ಕೆ ಅರ್ಥ. ಇದರ ಮೂಲಕ ಮೋಕ್ಷಕ್ಕೆ ಸಾಧನವಾದ ನಾದ–ಲಯ–ಯೋಗ–ಆನಂದಗಳ ಅನುಭವವನ್ನು ಹೇಳಲಾಗಿದೆ. ಯೋಗ ಶಬ್ದಕ್ಕೆ ಚಿತ್ತವೃತ್ತಿನಿರೋಧವೆಂದು ಅರ್ಥ. ಚಿತ್ತವೃತ್ತಿನಿರೋಧವೇ ಪ್ರಧಾನವಾಗಿರುವುದರಿಂದ ವೈಶ್ಯಜಾತಿಯ ವರಿಂದಲೂ ಉಪಾಸಿಸಲ್ಪಡುವ ಜಗತೀಛಂದಸ್ಸಿನ ಸಾರವನ್ನು ಇದರಿಂದ ತಿಳಿಸ ಲಾಗಿದೆ. ಸಾಮವೇದವು ಗಾನಪ್ರಧಾನವಾದುದು. ನಾದವು ಚಿತ್ತದಲ್ಲಿ ಲೀನವಾಗು ವುದು. ಆದ್ದರಿಂದ ಇಲ್ಲಿ ನಾದಲಯಯೋಗವೂ ಉಪವರ್ಣಿತವಾಗಿರುವುದರಿಂದ ಸಾಮವೇದಸ್ವರೂಪವೆಂದು ತಿಳಿಸಲಾಗಿದೆ. ಈ ಶ್ರೀವಿದ್ಯಾಮಂತ್ರ – ಬೀಜಾಕ್ಷರಗಳ ಅರ್ಥವಿದು. ಕ–ಏ–ಈ–ಲ–ಹ್ರೀ–ಹ–ಸ–ಕ–ಹ–ಲ–ಹ್ರೀ ಆಗಿದೆ. ಈ ವರ್ಣಗಳನ್ನುಚೆನ್ನಾಗಿ ತಿಳಿಸಿಕೊಡುವುದರಿಂದ ಅದು ಕಏಈಲಹ್ರೀ ಎಂಬ ಈ ವರ್ಣಗಳನ್ನು ಹೀಗೆ–ಉಚ್ಚರಿಸಬೇಕು. 'ಹಸಕಹಲಹ್ರೀ–ಸಕಲಕಏಈಲಹ್ರೀ–ಸಕಲಕಏಈಲಹ್ರೀ–ಹಸಕಹಲಹ್ರೀ–ಸಕಲಹ್ರೀ–ಕಏಈಲಹ್ರೀ–ಹಸಕಹಲಹ್ರೀ–ಸಕಲಹ್ರೀ'–ಎಂಬುದಾಗಿ, ಇದರಿಂದ ತಿಳಿದು ಬರುವ ಅಂಶವೆಂದರೆ ಉತ್ತರೋತ್ತರವಾಗಿ ಬುದ್ಧಿಯು ವಿಕಾಸಹೊಂದಿದಾಗ ವಾಗ್ವ್ಯತ್ತಿಯು ಅತಿಶಯತೆಯನ್ನು ಪಡೆಯುವುದು. ಇದರಿಂದ ಅನಿಷ್ಟ ನಿವಾರಣೆಯಾಗುವುದು. ಭೋಗಭಾಗ್ಯಗಳು ವೃದ್ಧಿಹೊಂದುವುವು. ಅತಿಶಯವಾಗಿ ಕೀರ್ತಿಯ ಸಮುದಾಯವೇ ಉಂಟಾಗುವುದು. ಇದನ್ನೆಲ್ಲ ಉಂಟುಮಾಡುವುದೇ ಜ್ಞಾನರೂಪ ಶಕ್ತಿ ಇದು ಹೃದಯಮಧ್ಯದಲ್ಲಿರುವ ದಹರಾಕಾಶದಲ್ಲಿ ದೀಪಶಿಖೆಯಂತೆ ಬೆಳಗುತ್ತಿರುವುದು. ಇದು ಸಕಲತತ್ತ್ವಗಳಿಗೂ ಅಧಿಷ್ಠಾನವಾಗಿದೆ. ನಿರತಿಶಯವಾದ

ಆನಂದವನ್ನುಂಟುಮಾಡುವ ಜ್ಞಾನದ ಅನುಭವವನ್ನು ಪ್ರಕಾಶಪಡಿಸುವ ನಾದಾನುಭವವನ್ನು ಮೀರಿನಿಂತಿರುವ ಚಿಚ್ಛಕ್ತಿಯಾಗಿದೆ. ಸಾಮವೇದದಲ್ಲಿ ಬರುವ ಮಂತ್ರಸಮುದಾಯಗಳಿಗೆ ಸ್ತೋಭವೆಂದು ಹೆಸರು. ಸಾಮಾನ್ಯವಾಗಿ ಸ್ತೋಭಗಳಲ್ಲಿ ಹಕಾರವು ಅಧಿಕವಾಗಿರುತ್ತದೆ. ಇವುಗಳಲ್ಲಿ ಹಕಾರಸ್ತೋಭ-ನಿಧನಸ್ತೋಭ-ಮೊದಲಾಗಿ ಅನೇಕ ಬಗೆಗಳಿವೆ. ಇಲ್ಲೂ ಸಹ ಹಕಾರಾದಿಗಳ ಆಧಿಕ್ಯದಿಂದ ಸ್ತೋಭರೂಪವಾದ ಸಾಮವೇದಸ್ವರೂಪವನ್ನು ಇದು ಹೊಂದಿದೆ. ಹಕಾರಾಧಿಕ್ಯ ಮತ್ತು ನಾದಪ್ರಾಧಾನ್ಯದ ಕಾರಣ ಶ್ರೀವಿದ್ಯಾಮಂತ್ರವು ಸಾಮವೇದ ಸ್ವರೂಪವಾಗಿಯೂ ಇದೆ.

'ಸಾಮವೇದವು ಬ್ರಾಹ್ಮಣಗಳ ಉತ್ಪತ್ತಿಗೆ ಮೂಲ' ಎನ್ನುವುದು ಶ್ರುತಿ ಪ್ರಮಾಣದಿಂದ ತಿಳಿದಿರುವ ವಿಷಯ. ಬ್ರಾಹ್ಮಣರಿಗೆ ಹೇಗೆ ಇದು ಉಪಾಸನಾರ್ಹವೋ ಹಾಗೇ ಇತರರಿಗೂ ಇದು ಉಪಾಸನಾರ್ಹವಾಗಿರುವುದರಿಂದ ಇದು ಸರ್ವಜನಸಾಧಾರಣವಾದ ಮಂತ್ರವಾಗಿದೆ. ಹಾಗಾಗಿ ಸರ್ವಾತಿಶಯವಾದ ಅಭಿಲಾಷಾಪರಂಪರೆಗಳೇ ಇದರಿಂದ ಸಿದ್ಧಿಸುತ್ತವೆ.

ಇದೇ ನಿಜವಾದ ತತ್ತ್ವ. 'ಗಂಧದ್ವಾರಾಮ್' 'ಚಿತ್ರಾವಸೋ', 'ಆವಹಂತೀ' ಮೊದಲಾದ ಮಂತ್ರಗಳಿಂದ ಶ್ರುತಿಯನ್ನು ಪ್ರಶಂಸೆ ಮಾಡುತ್ತಾರೆ. ನಾಲ್ಕು ವೇದಗಳೂ ತಿಳಿಸುವ ಒಂದಂಶವೆಂದರೆ ಜ್ಞಾನಸ್ವರೂಪವು ಎಲ್ಲರಿಗೂ ದೊರಕಬೇಕೆನ್ನುವುದು. ವೇದತ್ರಯಗಳಲ್ಲಿ ಇದರಸ್ವರೂಪವನ್ನು ಚೆನ್ನಾಗಿ ಪ್ರತಿಪಾದಿಸಿರುವುದರಿಂದ ಮೂರು ವೇದಗಳಿಗನುಸಾರ ಕ್ರಮವಾಗಿ ಮೂಲ-ಹೃತ್-ಮೂರ್ಧಾ ಎಂಬ ಮೂರು ಸ್ಥಳಗಳಲ್ಲಿ ಈ ಶ್ರೀವಿದ್ಯಾಮಂತ್ರವು ಅಡಕವಾಗಿದೆ ಎಂದು ಸಿದ್ಧಿಸುತ್ತದೆ.

ವೇದಗಳ ಮಂತ್ರಗಳನ್ನು ಎಲ್ಲೆಲ್ಲಿ ಉಚ್ಚರಿಸಿದ್ದಾರೋ ಆಯಾಯಾ ಸ್ಥಾನಗಳಲ್ಲಿ ಉಚ್ಚಾರಣೆ ಮಾಡಿದಾಗಲೇ ಅದಕ್ಕೆ ಬೆಲೆ. ವಿಶ್ವಕಲ್ಯಾಣಕವಾದ ಮಂತ್ರಗಳನ್ನು ಹೇಳಿದ್ದರಿಂದ ಉಷ್ಣಿಕ್‌ಛಂದಸ್ಸಿನ ಧರ್ಮವನ್ನು ಹೊಂದುತ್ತದೆ. ಹೃದಯದೊಳಗೆ ದೀಪಶಿಖಾಂತರ್ಗತವಾಗಿರುವುದರಿಂದ ಅಂತವುಳ್ಳದ್ದಾಗುವುದು. ಅಂತ್ಯಖಂಡವನ್ನು ಸ್ವತಂತ್ರವಾಗಿ ಹೇಳಿದ ಕಾರಣ ಈಛಂದಸ್ಸನ್ನು ಮೀರಿನಿಂತಂತಾಗಿದೆ. ಅಂತ್ಯದಲ್ಲಿ ಇವೆಲ್ಲವೂ ಒಂದೇ ವರ್ಣದಲ್ಲಿ ಸೇರಿಹೋಗುವುವು.

ಋಗ್ವೇದದ ಹತ್ತನೆಯ ಮಂಡಲದ 125 ನೆಯ ಸೂಕ್ತದ ಆಂಭೃಣೀಸೂಕ್ತದ ಮಂತ್ರಗಳಲ್ಲಿ ದೇವಿಯೇ ಎಲ್ಲದಕ್ಕೂ ಮೂಲ ಕಾರಣಳು ಎನ್ನುವುದನ್ನು ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ. ಅಲ್ಲಿ ಶ್ರೀವಿದ್ಯಾದೇವಿಯೇ ಹೀಗೆ ಹೇಳಿಕೊಳ್ಳುವಳು. ನನ್ನೊಡನೆ

ಸಕಲ ಜೀವರಾಶಿಗಳೂ ಜೀವಿಸುತ್ತಿವೆ. ನಾನೇ ಎಲ್ಲರ ಶರೀರದಲ್ಲಿದ್ದುಕೊಂಡೇ ಕಣ್ಣಿನಿಂದ ನೋಡುತ್ತಿದ್ದೇನೆ. ಕಿವಿಗಳಿಂದ ಕೇಳುತ್ತಿದ್ದೇನೆ. ಅನ್ನಾದಿಗಳನ್ನು ತಿನ್ನುತ್ತಿದ್ದೇನೆ. ಪ್ರಾಣದಿಂದಿದ್ದೇನೆ ಎಲ್ಲವನ್ನೂ ಕೇಳುತ್ತಿದ್ದೇನೆ. ಶ್ವಾಸೋಚ್ಛ್ವಾಸರೂಪದಿಂದ ಎಲ್ಲ ವ್ಯಾಪಾರಗಳನ್ನು ನಿರ್ವಹಿಸುತ್ತಿದ್ದೇನೆ. ಯಾರು ಎಲ್ಲೆಡೆ ಅಂತರ್ಯಾಮಿರೂಪಳಾದ ನನ್ನನ್ನು ತಿಳಿಯುವುದಿಲ್ಲವೋ ಅವರು ಅಜ್ಞರು. ಅವರು ಈ ಸಂಸಾರದಲ್ಲಿ ನಾಶವಾಗುವರು. ಎಲೈ ಜ್ಞಾನಿಯೇ ನಾನು ಹೇಳುವುದನ್ನು ಶ್ರದ್ಧೆಯಿಂದ ಕೇಳು. ಶ್ರದ್ಧಾಪ್ರಯತ್ನದಿಂಡ ದೊರಕುವ ಈ ರೀತಿಯ ಬ್ರಹ್ಮರೂಪವಸ್ತುವನ್ನು ನಿನಗೆ ತಿಳಿಸುತ್ತೇನೆ ಕೇಳು ಎಂಬುದಾಗಿ ಈ ಬ್ರಹ್ಮರೂಪವಸ್ತುವನ್ನು ನಾನೇ ನಿನಗೆ ಉಪದೇಶಿಸುತ್ತೇನೆ. ಇಂದ್ರಾದಿದೇವತೆಗಳು ಮನುಷ್ಯ ಮೊದಲಾದವರೂ ನನ್ನನ್ನೇ ಸೇವಿಸುವರು. ಯಾವ ವ್ಯಕ್ತಿಯನ್ನು ನಾನು ರಕ್ಷಿಸಲು ಬಯಸಿ ಇಷ್ಟಪಡುತ್ತೇನೋ ಆಗ ಅವನನ್ನು ಸರ್ವೋತ್ಕೃಷ್ಟವ್ಯಕ್ತಿಯನ್ನಾಗಿ ಮಾಡುತ್ತೇನೆ. ಅವನನ್ನೇ ಲೋಕಸೃಷ್ಟಿಕಾರಕ ಬ್ರಹ್ಮನನ್ನಾಗಿ ಮಾಡುತ್ತೇನೆ. ಅವನನ್ನೇ ಅತೀಂದ್ರಿಯವಸ್ತುಗಳನ್ನು ನೋಡುವ ಋಷಿಯನ್ನಾಗಿ ಮಾಡುತ್ತೇನೆ. ಅವನನ್ನು ಸರ್ವಶ್ರೇಷ್ಠಜ್ಞಾನಿಯನ್ನಾಗಿ ಮಾಡುತ್ತೇನೆ ಎಂಬುದಾಗಿ ಸಕಲಮಂತ್ರಗಳೂ ಪಂಚದಶವರ್ಣಾತ್ಮಕವಾಗಿದ್ದು ಶ್ರೀವಿದ್ಯಾತತ್ತ್ವವನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತಿವೆ ಎನ್ನುವುದು ಕಾಂಡಾನುಕ್ರಮಣಿಕೆಯಿಂದ ತಿಳಿದು ಬರುತ್ತದೆ.

ಶ್ರೀವಿದ್ಯಾಮಂತ್ರಪ್ರತಿಪಾದಿತವಾದ ಚೈತನ್ಯಶಕ್ತಿಯು ಸ್ವತಂತ್ರವಾಗಿ ಉಪಾಸ್ಯಮಾನವಾಗುವ ಮಾಲಿನೀಬೀಜಸ್ವರೂಪದಲ್ಲಿದೆ ಹಾಗೂ ಬಿಂದುನಾದ ವರ್ಣದ್ವಯಗಳಿಂದ ಕೂಡಿ ಇವೆರಡನ್ನು ಸೇರಿಸಿಕೊಂಡು ಹೇಳುವ ಕಾರಣ ಉಷ್ಣಿಕ್‌ಛಂದೋರೂಪವಾಗಿಯೂ ಇದೆ. ಮನುಪ್ರತಿಪಾದಿತವಾದ ಶ್ರೀವಿದ್ಯಾಮಂತ್ರವು ಖಂಡತ್ರಯಾತ್ಮಕವಾಗಿರುವುದರಿಂದ ಅನುಷ್ಟುಪ್ ಛಂದೋಮಯರೂಪದಲ್ಲಿಯೂ ಇದೆ. ಆ ಖಂಡವನ್ನು ಪ್ರಧಾನವಾಗಿ ಹೇಳಿರುವುದರಿಂದ ಎಂಟುವರ್ಣಗಳ ರೂಪದ ಅತಿಛಂದೋಮಯರೂಪವಾಗಿದೆ. ಅದರಲ್ಲಿಯೂ ಎರಡನೆಯ ಮಾಯಾಬೀಜವಿಲ್ಲದ ಕಾರಣ ಸಕಲವರ್ಣದವರಿಗೂ ಇದು ಉಪಸನಾರ್ಹವಾದುದೆಂದು ಹೇಳಿದ ಕಾರಣ ಜಗತೀಛಂದೋಮಯವಾಗಿರುವುದು. ಪಂಚದಶವರ್ಣರೂಪವಾದ ಶಕ್ತಿ ಬೀಜ ರೂಪವಾಗಿರುವುದರಿಂದ ಪಂಕ್ತಿಛಂದೋರೂಪವಾಗಿದೆ. ಮಹತ್ತರವಾದ ಮಾಯೆಯನ್ನು ಮೀರಿರುವ ಕಾರಣ ಸರ್ವವರ್ಣದವರಿಗೂ ಬೇಕಾದ ಬೃಹತೀಛಂದೋರೂಪವಾಗಿದೆ. ಹೀಗೆ ಈ ಶ್ರೀವಿದ್ಯೆಯು ಸಕಲ ಛಂದೋರೂಪವಾಗಿದ್ದು ಮಂತ್ರ–ಬ್ರಾಹ್ಮಣ–ಉಪನಿಷತ್ತುಗಳೆಂಬ

ಖಂಡತ್ರಯಾತ್ಮವಾಗಿದೆ.

ಸಕಲಕಲಾಸಮಷ್ಟಿಯಿಂದ ಕೂಡಿರುವ ಈ ಶ್ರೀವಿದ್ಯೆಯು ಎಲ್ಲ ವೇದಗಳಲ್ಲೂ ಸಕಲಚೈತನ್ಯಸ್ವರೂಪವೆಂದು ರಹಸ್ಯವಾಗಿ ತಿಳಿಸಲ್ಪಟ್ಟಿದೆ. ಆದ್ದರಿಂದ ಶೈವ–ವೈಷ್ಣವ–ಗಾಣಾಪತ್ಯ–ಸೌರ–ಕಾಪಾಲಿಕಮಂತ್ರಗಳಲ್ಲಿಯೂ ಇದನ್ನೂ ಸೇರಿಸಿಕೊಂಡು ಉಪಾಸನೆ ಮಾಡುತ್ತಾರೆ. ಈ ಶ್ರೀವಿದ್ಯೆಯನ್ನು ಮಹಾನಾರಾಯಣೋಪನಿಷತ್ತಿನ ಉತ್ತರನಾರಾಯಣಾನುವಾಕದಲ್ಲಿ ಸಕಲ ಪ್ರಪಂಚಕ್ಕೂ ಸಾರರೂಪವಾದ ಬ್ರಹ್ಮತೇಜಸ್ಸಿನ ಅಭಿವೃದ್ಧಿಗೆ ಕಾರಣ ಭೂತವಾದುದೆಂದು ಪ್ರಂಶಸೆಮಾಡಿದ್ದಾರೆ.

ಇದು ಸಕಲ ಪುರುಷಾರ್ಥಗಳ ಪ್ರಾಪ್ತಿಗೆ ಕಾರಣವಾಗದೆ ಆತ್ಮಜ್ಞಾನ ಪ್ರಕಾಶಕ್ಕೆ ಸಾಧನವಾಗಿದೆ. ಶ್ರೀವಿದ್ಯೆಯು ಜೀವಬ್ರಹ್ರ ಸಮರಸಭಾವರೂಪವಾಗಿದ್ದು ಮೋಕ್ಷಸಾಧಕವಾಗಿದೆ.

ಈ ಶ್ರೀವಿದ್ಯಾರಹಸ್ಯವನ್ನು ಮೊದಲಿಗೆ ಶ್ರೇಷ್ಠನಾದ ಮನುವು ಹಯಗ್ರೀವನ ಪ್ರಸಾದದಿಂದ ಪಡೆದನು. ಪ್ರಶಸ್ತ ಮತಿಯಾದ ಅಗಸ್ತ್ಯನು ಇದಕ್ಕೆ ಟೀಕೆಯನ್ನು ರಚಿಸಿದ್ದಾನೆ. ಈ ಶ್ರೀವಿದ್ಯೆಯು ಸಕಲ ಕಲಾತತ್ತ್ವಗಳಿಂದ ಉದ್ಭಾಸಿತವಾಗಿದೆ. ಅಪರಿಮಿತವಾದ ಭಾಗ್ಯಗಳನ್ನು ಇದು ಉಂಟುಮಾಡುತ್ತದೆ. ವಿದ್ವಾಂಸರ ಉಪಯೋಗಕ್ಕಾಗಿ ಮೂರು ವೇದಗಳ ಸಾರದಿಂದ ಶ್ರೀವಿದ್ಯೆಯನ್ನು ಉದ್ಧರಿಸಿ ಪ್ರತಿಪಾದಿಸಲಾಗಿದೆ.

ಹೀಗೆ ಶ್ರೀ ಮತ್ಪರಮಶಿವ ಪರಬ್ರಹ್ಮರೂಪಿಯಾದ ಅಗಸ್ತ್ಯ – ಮುನಿಯಿಂದ ಶ್ರುತಿಗಳ ಸಾರದಿಂದ ಉದ್ಧರಿಸಿ ರಚಿಸಲ್ಪಟ್ಟ ಶ್ರೀಪಂಚದಶಾಕ್ಷರೀ ಶ್ರೀ ವಿದ್ಯಾಮನುಟೀಕೆಯು ಮುಕ್ತಾಯವಾಯಿತು.

ಯಾರಿಗೆ ಪುನರ್ಜನ್ಮವಿರುವುದಿಲ್ಲವೋ ಅಥವಾ ಯಾರು ಸ್ವಯಂ ಶಂಕರಸ್ವರೂಪಿಗಳಾಗಿರುವರೋ ಅಂತಹವರು ಮಾತ್ರ ಸರ್ವಶ್ರೇಷ್ಠವಾದ ಪಂಚದಶಾಕ್ಷರೀ ಶ್ರೀವಿದ್ಯೆಯನ್ನು ಪಡೆಯುತ್ತಾರೆ.

ಓಂತತ್ಸತ್

अनुबन्धभागः

मूलग्रन्थभागमध्ये समागतानां मन्त्राणाम् उपयुक्तविषयाणां च विवरणम्

१) अ. गन्धद्वाराम् -

ऋग्वेदस्य खिलसूक्तस्य मध्ये उक्तस्य श्रीसूक्तस्य मन्त्रोऽयम् ।

ऋग्वेदस्य एकादशतमं खिलसूक्तमेव श्रीसूक्तम् ।

(ऋ अ-अ ४-४-३४)

(ऋग्वेदस्य पञ्चममण्डलस्यान्ते सूक्तमिदं समागच्छति)

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ॥

(मन्त्रसंख्या-९)

(२ अध्याय-६खिलसूक्तम्-मं ९)

(गन्धो घ्राणग्राह्यो गुणो द्वारं लक्षणं यस्याः ताम् । दुराधर्षां-केनापि धर्षयितुमशक्यां नित्यपुष्टां-नित्यं सदा सस्यादिभिः पुष्टां-समृद्धाम्। करीषिणीम् -करीषः शुष्कगोमयादिः तद्वतीम् । गवाश्वादिबहुपशुसमृद्धामिति यावत् । सर्वभूतानाम् सर्वप्राणिनाम् ईश्वरीम् अधिष्ठात्रीम् आधारभूतां वा । तां भूरूपां श्रियम् इह लोक उप ह्वये उपाह्वये समीपं प्रत्याह्वये ।)

२) आ) आवहन्ती - (ऋ. सं-मं१ सू ११३-मं १५) आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।

ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥

(देवीनां हविःषु 'आवहन्ती' इत्येषा उषसो याज्या । सूत्रितं च-'आ द्यां तनोषि रश्मिभिरावहन्ती पोष्या वार्याणि न ता अर्वा रेणुककाटो अश्नुते'

(आश्व श्रौ ६-१४ इति)'

पोष्या- यावज्जीवं पोषणसमर्थानि । वार्याणि-वरणीयानि धनानि । आवहन्ती अस्मभ्यमानयन्ती । चेकिताना-सर्वं जनं प्रज्ञापयन्ती । उषाः चित्रं विचित्रम् आश्चर्यभूतं चायनीयं वा । केतुं-प्रज्ञापकं रश्मिं कृत्स्नजगत्प्रकाशनसमर्थम् । कृणुते-स्वात्मनः प्रकाशात् कुरुते । सैषा-ईयुषीणाम् गमनवतीनां पूर्वनिष्पन्नानाम्। शश्वतीनाम्-बह्वीनाम् उषसाम् । उपमा-उपसमीपे निर्मिता उपमानभूता वा । विभातीनाम् -विशेषेण प्रकाशमानानाम् आगामिनीनाम् उषसाम् । प्रथमा -आद्या एवं भूता उषाः । व्यश्वैत्-तेजसा प्रवृद्धा आसीत् । चत्वारि वाक् .... ३) (ऋग्वेदसंहिता मं१ सू१६४-मंत्र ४५)

वाग्देवत्यै पशौ 'चत्वारि वाक्' इति हविषोऽनुवाक्या । 'चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवीयमानम् ' (आश्वलायनश्रौतसूत्रम् ३-८) इति सूत्रितत्वात् ।

मन्त्रः-''चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ।

सायणभाष्यम्- वाक्-वाचः कृत्स्नायाः । पदानि चत्वारि परिमिता-परिमितानि । लोके या वागस्ति सा चतुर्विधा विभक्तेत्यर्थः । तानि-पदानि । ब्राह्मणाः-वेदविदः मनीषिणः मनस ईषिणो मेधाविनः विदुः-जानन्ति । तेषां मध्ये त्रीणि गुहा-गुहायां निहिता-स्थापितानि नेङ्गयन्ति-न चेष्टन्ते न प्रकाशन्ते इत्यर्थः । वाचः तुरीयं पदम् मनुष्याः-अज्ञाः तज्ज्ञाश्च वदन्ति-व्यक्तम् उच्चारयन्ति व्यवहरन्ति । कानि तानि चत्वारि इत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति । सर्ववैदिकवाग्जालस्य संग्रहरूपाः भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात् तासां व्याहृतीनामेव सारसंग्रहभूतत्वात् अकाराद्यात्मकस्य प्रणवस्यैति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन वेदवादिनो वदन्ति ।

अपरे व्याकरणमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन १) क्रियाप्रधानमाख्यातम् २)द्रव्यप्रधानं नाम ३)प्रागुपसृज्यते आख्यातपदस्येत्युपसर्गः प्रादिः ४)उच्चावचेष्वर्थेषु निपातनात् निपातः अपि तु च इत्यादिः ।

एतेष्वेव सर्वा वाक् परिमिता इति अखण्डायाः कृत्स्नायाः वाचः चतुर्धा व्याकृतत्वात् ''वाग्वै पराच्य व्याकृतावदत् तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मात् इयं व्याकृता वागुद्यते' (तै.सं, ६-४-७-३) इति श्रुतेः ।

अन्ये तु याज्ञिकाः मन्त्राः कल्पो ब्राह्मणं चतुर्थी लौकिकीति-

१) याज्ञिकैः समाख्यातः अनुष्ठेयार्थप्रकाशको वेदभागो मन्त्रः ।

२) मन्त्रविधानप्रतिपादको वेदभागः 'इति मन्त्राः कल्पोऽत ऊर्ध्वम्' (तै. आ. १-३१-२) इत्यादिनोक्तः कल्पः ।

३) मन्त्रतात्पर्यार्थप्रकाशको वेदभागो ब्राह्मणम् ।

४) भोगविषया गामानय इत्यादिरूपा व्यावहारिकी । एष्वेव सर्वा वाक् नियमितेति याज्ञिकाः ।

ऋग्यजुस्सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः । सर्पाणां वाग्वयसां क्षुद्रसरीसृपस्य च चतुर्थी व्यावहारिकीति ऐतिहासिकाः । पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मवादिनः ।

अपरे मातृकाः प्रकारान्तरेण प्रतिपादयन्ति-परा पश्यन्ती मध्यमा वैखरीति चत्वारीति ।

एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते । नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्ती इत्युच्यते योगिभिः द्रष्टुं शक्यत्वात् । सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते । मध्ये हृदयाख्ये

उदीयमानत्वात् मध्यमायाः । अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते । एवं चत्वारि वाचः पदानि परिमितानि । मनीषिणः मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणाः रवाख्यस्य शब्दब्रह्मणः अधिगन्तारो योगिनः परादिचत्वारि पदानि विदुः जानन्ति । तेषु मध्ये त्रीणि परादीनि गुहा निहितानि हृदयान्तर्वर्तित्वात् । तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति । व्याकरणप्रसिद्धनामाख्यातादिपक्षे मनीषिणो ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञाः वाग्योगविदः तानि पदानि जानन्ति । अवाग्योगविदः पामराः वाचो वाङ्मयस्य तुरीयं चतुर्थं भागं वदन्ति व्यवहरन्ति । अर्थप्रकाशनाय प्रयुञ्जते ।

अयं मन्त्रो निरुक्ते व्याख्यातः । सोऽत्राप्यनुसन्धेयः-

'अथापि ब्राह्मणं भवति । सा वै वाक् सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयम् । या पृथिव्यां साग्नौ सा रथन्तरे । यान्तरिक्षे सा वायौ सा वामदेव्ये । या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत । तां ब्राह्मणेष्वदधुः । तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणाम्' (निरुक्तम् १३-९) इति ।

आवहन्ती - (तैत्तिरीयोपनिषत् - शीक्षावल्ली-चतुर्थः अनुवाकः २.३ मन्त्राः (श्रीशाङ्करभाष्यं च)

आवहन्ती वितन्वाना ॥१॥ कुर्वाणाचीरमात्मनः । वासाँसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिः सह स्वाहा । आमायन्तु ब्रह्मचारिणः स्वाहा । विमायन्तु ब्रह्मचारिणः स्वाहा । प्रमायन्तु ब्रह्मचारिणः स्वाहा । दमायन्तु ब्रह्मचारिणः स्वाहा । शमायन्तु ब्रह्मचारिणः स्वाहा ॥२॥

यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन् सहस्रशाखे ।

निभगाहं त्वयि मृजे स्वाहा । यथापः प्रवता यन्ति । यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः स्वाहा । प्रतिवेशोऽसि प्र मा पाहि प्र मा पद्यस्व ॥३॥

(शा. भा. श्रीकामस्य होमार्थास्त्वधुनोच्यन्ते मन्त्राः - आवहन्ती- आनयन्ती । वितन्वाना विस्तारयन्ती तनोतेः तत्कर्मकत्वात् । कुर्वाणा-निर्वर्तयन्ती । अचीरम् -अचिरं क्षिप्रमेव -छान्दसो दीर्घः । चिरं वा कुर्वाणा। आत्मनः - मम । किमित्याह वासांसि-वस्त्राणि । मम गावश्च-गाश्चेति यावत् । अन्नपाने च सर्वदा-एवमादीनि कुर्वाणा । श्रीर्या ताम् - ततः मेधानिर्वर्तनात्परम् आवह आनय। अमेधसो हि श्रीरनर्थायैवेति । किं विशिष्टाम् - लोमशाम्-अजाव्यादियुक्ताम् अन्यैश्च पशुभिः सह-युक्ताम् आवहेति । अधिकारादोंकार एवाभिसंबध्यते । स्वाहा-स्वाहाकारो होमार्थमन्त्रान्तज्ञापनार्थः । आमायन्त्विति-आयन्तु मामिति व्यवहितेन सम्बन्धः ब्रह्मचारिणः । विमायन्तु प्रमायन्तु दमायन्तु शमायन्तु इत्यादि । यशोजने यशस्विजनेषु असानि भवानि । श्रेयान्-प्रशस्यतरः वस्यसः-वसीयसः वसुतराद्वसुमत्तराद्वा धनवज्जातीयपुरुषात् विशेषवानहमसानीत्यर्थः किं च तं ब्रह्मणः कोशभूतं त्वा त्वां हे भग-भगवन् । प्रविश आवयोरेकात्मत्वमेवास्तु । तस्मिन्-त्वयि । सहस्रशाखे बहुशाखाभेदे हे भगवन् । निमृजे- शोधयामि । अहं पापकृत्याम् । यथा लोके आपः प्रवता प्रवणवता निमग्नवता देशेन यन्ति-गच्छन्ति यथा च मासाः अहर्जरम् संवत्सरोऽहर्जरः अहोभिः परिवर्तमानो लोकाज्जरयतीति । अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्तीत्यहर्जरः । तं च यथा मासाः यन्ति एवं मां ब्रह्मचारिणः हे धातः सर्वस्य विधातः माम् आयन्तु आगच्छन्तु सर्वतः सर्वदिभ्यः। प्रतिवेशः श्रमापनयनस्थानम् आसन्नं गृहमित्यर्थः। एवं त्वं प्रतिवेश इव प्रतिवेशः त्वच्छीलिनां सर्वपापदुःखापनयनस्थानमसि । अतः मा-मां प्रति प्रभाहि-प्रकाशयात्मानम् । प्र मा पद्यस्व-प्रपद्यस्व च माम् । रसविद्धमिव लोहं त्वन्मयं त्वदात्मानं कुर्वित्यर्थः । श्रीकामोऽस्मिन् विद्याप्रकरणे अभिधीयमानो धनार्थः ;

धनं च कामार्थम् ; कर्म च उपात्तदुरितक्षयार्थम् । तत्क्षये हि विद्या प्रकाशते । तथा च स्मृतिः-

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यदादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि ॥ इति ॥

आवहन्ती....... मा पद्यस्व (श्रीरङ्गरामानुजमुनिवरभाष्यम्) विद्यौपयिकहोमसाधनमन्त्राः उच्यन्ते - आवहन्ती सह स्वाहा । लक्ष्मीप्रार्थनामन्त्रोऽयम् । आवहन्ती उत्पादयन्ती वितन्वाना-वर्धयन्ती यतस्त्वम्

ततो मे चीरमितराणि वासांसि गाः अन्नपाने च सर्वदा कुर्वाणा सती 'सा हि श्रीरमृता सताम्' इति त्रयीलक्षणां श्रियम् । लोमशांम् - बहुलाम् - यज्ञाद्यौपयिकपश्वादिद्रव्यैस्सह आवह-उत्पादय । होमसाधनत्वान्मन्त्रस्य स्वाहान्तत्वम् । आ मा यन्तुस्वाहा ब्रह्मविद्यायोग्याः ब्रह्मचर्यव्रतसंपन्नाः शिष्याः मामागच्छन्तु इत्यनुकूलशिष्यप्रार्थनामन्त्रः । यशो.....स्वाहा...... जनमध्ये यशस्वी भवानीत्यर्थः । श्रेयान् .....स्वाहा वस्यसः -वसीयसः वसुमत्तराणां मध्ये श्रेष्ठो भूयासम् इत्यर्थः । तंत्वा.... स्वाहा । हेभगेति ऐश्वर्यादीनां संबोधनम् । तं त्वां प्रविशन्ति -प्राप्नुवानीत्यर्थः । स मा...... स्वाहा... हे भग स त्वं मां प्राप्नुहीत्यर्थः । तस्मिन्..... स्वाहा ! हे भग ! सहस्रशाखे ऐश्वर्यवीर्याद्यनन्तविधायुक्ते त्वयि प्रविष्टोऽहम् । निमृजे-शुद्धो भवानीत्यर्थः । मृजूष्-शुद्धौ इति हि धातुः। यथा.... स्वाहा-हे धातः परमात्मन् यथा जलानि प्रवताः प्रवणाः दिशो यन्ति । तानादिकात् वनुतेः निष्ठायामनुनासिकलोपः । यथा मासा अहर्जरम् -अहोभिर्जरा यस्य स पुरुषः अहर्जरः । यस्य कालेन जरा भवति न व्याध्यादिना सोऽहर्जरः । वृद्ध इति यावत्। तं यथा मासाः प्राप्नुवन्ति-यद्वा अहानि जीर्यन्ति यत्रेति अहर्जरः संवत्सरः सूर्यो वा-एवं मां योग्याः शिष्याः आयान्तु इत्यर्थः । प्रतिवेशोऽसि हे धातः त्वं प्रतिवेश शब्दित प्रतिगृहकल्पः सन्निहितोऽसीत्यर्थः । मा - मां प्रकर्षेण

पाहि । प्रपद्यस्व - अन्तर्भावितण्यर्थोऽयं पदिः। प्रपन्नं मां कुर्वित्यर्थः ॥

अहं रुद्रेभिः इति सूक्तविवरणम् - (ऋ.सं. मण्डलम् १०-सूक्तम्.१०-मन्त्राः ८)

सायणभाष्यविवरणम् -

'अहम्' इत्यष्टर्चं त्रयोदशं सूक्तम् । अम्भृणस्य महर्षेः दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानम् अस्तौत् । अतः सर्षिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति । द्वितीया जगती शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रान्तम्। 'अहमष्टौ वागाम्भृणी तुष्टावात्मानं द्वितीया जगती' इति । गतो विनियोगः ।

१) अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥

अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यद्ब्रह्म जगत्कारणं तद्रूपा भवन्ती रुद्रेभिः रुद्रैरेकादशभिः । तदात्मना चरामि । एवं वसुभिः इत्यादौ तत्तदात्मना चरामीति योज्यम् । तथा-मित्रावरुणा मित्रं च वरुणं च । उभा-उभौ अहम् एव ब्रह्मीभूता बिभर्मि-धारयामि । इन्द्राग्नी अपि-अहमेव धारयामि । उभा-उभौ अश्विना अश्विनावपि अहमेव धारयामि । मयि हि सर्वं जगच्छुक्तौ रजतमिव अध्यस्तं संदृश्यते। माया च जगदाकारेण विवर्तते । तादृश्या मायाया आधारत्वेन असङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योत्पत्तिः ॥

२) अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥

आहनसम् - आहन्तव्यम् अभिषोतव्यम् । सोमम् यद्वा शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहम् एव बिभर्मि । तथा त्वष्टारम् उत -

अपि च पूषणं भगं च अहम् एव बिभर्मि । तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये - शोभनं हविः देवानां प्रापयित्रे तर्पयित्रे सुन्वते - सोमाभिषवं कुर्वते ईदृशाय यजमानाय- द्रविणं-धनं यागफलरूपम् अहम् एव- दधामि-धारयामि

३) अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥

अहं राष्ट्री-सर्वस्य जगतः ईश्वरी । तथा वसूनां-धनानां संगमनी-संगमयित्री उपासकानां प्रापयित्री । चिकितुषी -यत्साक्षात् कर्तव्यं परं ब्रह्म तज्ज्ञातवती स्वात्मतया साक्षत्कृतवती । अत एव यज्ञियानां-यज्ञार्हाणां प्रथमा-मुख्या । या एवंगुणविशिष्टाहं तां मां भूरिस्थात्रां-बहुभावेन प्रपञ्चात्मनावतिष्ठमानां भूरि-भूरीणि बहूनि भूतजातानि आवेशयन्तीम् - जीवभावेन आत्मानं प्रवेशयन्तीम् ईदृशीं माम् पुरुत्रा -बहुषु देशेषु व्यदधुः देवाः -विदधति कुर्वन्ति । उक्तप्रकारेण वैश्वरूप्येण अवस्थानात् यद्यत् कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः ।

४) मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥

यः अन्नमत्ति सः भोक्तृशक्तिरूपया मया एव अन्नमत्ति । यः च विपश्यति - आलोकयति यः च - प्राणिति श्वासोच्छ्वासरूपं व्यापारं करोति सोऽपि मयैव । यश्च उक्तं शृणोति यः ईहशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः-अमन्यमाना अजानन्तः उपक्षियन्ति -उपक्षीणाः संसारेण हीना भवन्ति । माम् अमन्तवः मद्विषयज्ञानरहिताः इत्यर्थः । हे श्रुत विश्रुत सखे श्रुधि-मया वक्ष्यमाणं शृणु । श्रद्धिवम्- श्रद्धायत्नेन लभ्यम् ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ।

५) अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥

अहं स्वयमेव इदं-ब्रह्मात्मकं वस्तु वदामि-उपदिशामि । देवेभिः-इन्द्रादिभिर्देवैरपि जुष्टं सेवितम् । उत अपि च मानुषेभिः मनुष्यैरपि जुष्टम् । ईदृग्वस्त्वात्मिकाहं यं कामये यं पुरुषं रक्षितुमहं वाञ्छामि तं तं पुरुषम् उग्रं-कृणोमि सर्वेभ्यः अधिकं करोमि । तम् एव ब्रह्माणं-स्रष्टारं करोमि । तम् एव ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि । तम् एव सुमेधां-शोभनप्रज्ञं च करोमि ।

६) अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।

अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ।

पुरा त्रिपुरविजयसमये रुद्राय-रुद्रस्य महादेवस्य धनुः चापम् अहम् आतनोमि ज्ययाततं करोमि । किमर्थम् । ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे-शरुं हिंसकं त्रिपुरनिवासिनमसुरं हन्तवै हन्तुं हिंसितुम् अहमेव समदं- समानं माद्यन्ति अस्मिन् इति समत् संग्रामः । स्तोतृजनार्थं शत्रुभिः सह संग्रामम् अहमेव कृणोमि -करोमि । तथा द्यावापृथिवी -दिवं च पृथिवीं च अन्तर्यामितया अहम् एव आविवेश-प्रविष्टवती ।

७) अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्व१न्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोता मूं द्यां वर्ष्मणोपस्पृशामि ॥

पितरं दिवम् अहं सुवे-प्रसुवे जनयामि । अस्य-परमात्मनः मूर्धन्-मूर्धन्युपरि कारणभूते तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते तन्तुषु पट इव । मम च योनिः कारणं समुद्रे -समुद्द्रवन्ति अस्मात् भूतजातानि इति समुद्रः परमात्मा तस्मिन् परमात्मनि अप्सु -व्यापनशीलासु धीवृत्तिषु अन्तः -मध्ये यद् ब्रह्म चैतन्यं तन्मम कारणम् इत्यर्थः । यत ईदृग्भूता अहमस्मि । ततः हेतोः विश्वा -विश्वानि सर्वाणि भुवनानि भूतजातानि अनु प्रविश्य वितिष्ठे -विविधं व्याप्य तिष्ठामि । उत-अपि च अमूं - द्यां विप्रकृष्टदेशे अवस्थितं स्वर्गलोकम् । एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा -कारणभूतेन मायात्मकेन मदीयेन देहेन उपस्पृशामि । यद्वा अस्य भूलोकस्य मूर्धन्युपर्यहं पितरमाकाशं सुवे । समुद्रे जलधौ अप्सु अन्तर्मध्ये मम योनिः कारणभूतः अम्भृणाख्यः ऋषिः

वर्तते । यद्वा समुद्रे अन्तरिक्षे अप्सु - अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते । ततः अहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि।

८) अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिना सं बभूव ॥

विश्वा विश्वानि सर्वाणि भुवनानि - भूतजातानि कार्याणि आरभमाणा - कारणरूपेण उत्पादयन्ती अहमेव परेण अधिष्ठिता स्वयमेव प्रवामि -प्रवर्ते। वात इव यथा वातः परेण अभिप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । परो दिवा -दिवः आकाशस्य परस्तात् एना पृथिव्या -अस्याः पृथिव्याः परः-परस्तात् । द्यावापृथिव्योः उपलक्षणम् । एतदुपलक्षितात् सर्वस्मात् विकारजातात् परस्ताद्वर्तमाना सङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना -महिम्ना एतावती सं बभूव -सर्वजगदात्मना अहं संभूतास्मि ।

(ऋग्वेदसंहिता -भागः ४)

९-१० मण्डलात्मकः

वैदिकसंशोधनमण्डलम् , पूना १९४६